श्री शंखेश्वर पार्श्वनाथाय नमः

# दोधक वृत्तिः

[ प्राकृत रुपावलि सहिता ]

卐

: संपादक :

अध्यात्म-योगी पू. पं. श्री भद्रंकरविजयजी गणिवर

: प्रशिष्य :

मुनिश्री वज्रसेन विजयजी

卐

: प्र का श क :

जैन धार्मिक तत्त्वज्ञान पाठशाला,

आरती. सी. जुना नागरदास रोड,

अंधेरी इस्ट मुंबई-400 069.

मूल्य : ६-००

શ્રી શંખેશ્વર પાર્શ્વનાથાય નમઃ

# દોધકવૃત્તિ

[ પ્રાકૃત વ્યાકરણનાં ઉદાહરણો, અપભ્રંશનાં દોહાની વૃત્તિ, તથા સંક્ષિપ્ત પ્રાકૃત રૂપમાલા ]

卐


: સંપાદક :

અધ્યાત્મયોગી, વંદનીય વિભૂતિ પ. પૂ. પંન્યાસજી મ.

**શ્રી ભદ્રંકરવિજયજી ગણિવરશ્રીના**

**પ્રશિષ્ય મુનિશ્રી**

**વજ્રસેન વિજયજી મહારાજ**


卐


: પ્રકાશક :

**જૈન ધાર્મિક તત્ત્વજ્ઞાન પાઠશાળા**

આરતી. સી. જુના નાગરદાસ રોડ.

અંધેરી ઇસ્ટ

મુંબઈ–૬૯

: પ્રાપ્તિસ્થાનો :

૧ પાર્શ્વનાથ પુસ્તક ભંડાર
તળાટી રોડ, પાલીતાણા

૨ સોમચંદ ડી. શાહ
જીવનનિવાસ સામે, પાલીતાણા

૩ સેવન્તીલાલ વી. જૈન
૨૦, મહાજન ગલી, ઝવેરી બજાર, મુંબઈ-૨

૪ પાર્શ્વ પ્રકાશન
નિશાપોળ, રીલીફરોડ—અમદાવાદ-૧

આવૃત્તિ પહેલી — સંવત ૨૦૩૮

કિંમત : રૂ. ૬-૦૦

મુદ્રક :
ગૌતમ આર્ટ પ્રિન્ટર્સ
બ્યાવર (રાજસ્થાન)

# કાંઈક ઉપયોગી

કલિકાલ સર્વજ્ઞ પૂ. આચાર્ય ભગવંત શ્રી હેમચંદ્ર સૂરીશ્વરજી મ. ખરેખર પ્રાચીન ભારતીય સાહિત્યના ચમકતા સીતારા સમા, પ્રકાંડ વિદ્વાન, દિગ્ગજ પંડિત અને શબ્દ શાસ્ત્રના સમર્થ સર્જક હતા. ગૂર્જર નરેશ્વર શ્રી સિદ્ધરાજ જયસિંહની પ્રાર્થનાથી જૈન શાસનના જ્યોતિર્ધર આ મહાપુરૂષે 'શ્રી સિદ્ધહેમ શબ્દાનુશાસન નામનાં વ્યાકરણ ગ્રંથની મૌલિક રચના કરીને, ભારતીય પ્રાચીન સાહિત્ય સૃષ્ટિમાં અદ્‌ભુત ચમત્કાર સર્જ્યો હતો.

ને 'શબ્દાનુશાસન'ના આઠ અધ્યાયો દ્વારા તેઓશ્રીએ સમસ્ત પ્રાચ્ય ભાષાઓનું તલસ્પર્શી અને અગાધ જ્ઞાન દર્શાવેલ છે. જે શબ્દ શાસ્ત્રના જ્ઞાન માટે, એના જેવું અન્ય કોઈ સમર્થ શાસ્ત્ર નથી, એમ જરૂર કહી શકાય. સાત અધ્યાયમાં પૂજ્યપાદશ્રીએ સંસ્કૃત ભાષાનું જ્ઞાન, સાંગોપાંગ ને સર્વાંગ સમૃદ્ધ દર્શાવ્યું છે, એમ અવશ્ય કહી શકાય.

છેલ્લે આઠમો અધ્યાય કે જેની રચના દ્વારા પૂજ્યપાદશ્રીએ–પ્રાકૃત–અપભ્રંશ, પૈશાચી, શૌરસેની, માગધી આદિ ભાષાઓનું મર્મસ્પર્શી જ્ઞાન આપ્યું છે, તેના અભ્યાસી ભાષાપ્રેમી સ્વાધ્યાય શીલ વાચકને નવનીત રૂપ આ અધ્યાય ખૂબ જ ઉપકારક ને બોધક છે.

પ્રસ્તુત પ્રકાશનમાં પ્રાકૃત ભાષાના અભ્યાસક ને ઉપયોગી સાહિત્ય સુંદર શૈલીમાં સંયોજિત-સંકલિત થયેલ છે. પ્રાકૃત વ્યાકરણના વૃત્તિ ગ્રંથમા આવેલા ગદ્ય-પદ્ય ઉદાહરણો સંસ્કૃત છાયા સહિત અત્રે સંકલિત-સંગૃહીત થયેલ છે. આઠમા અધ્યાયના ચારે પાદોના, અન્યાન્ય ગ્રંથોમાંથી ઉદ્ધૃત, ગદ્ય પદ્ય ઉદાહરણોનો અત્રે સંકલિત સંગ્રહ અભ્યાસક આત્માઓની ભાષાં જ્ઞાનની ભૂખને પૂર્ણ રીતે સંતોષી શકે, તેવું સમર્થ છે.

બીજા વિભાગમાં પ્રાચીન મહા પુરૂષ રચિત દોધક વૃત્તિ જેમાં અપભ્રંશ વ્યાકરણમાં આવતાં ઉદાહરણ રૂપ દોહાઓ પર સુંદર સરલ તથા સુસ્પષ્ટ માર્ગદર્શન મલી શકે તેવી સરળ ટીકા છે. જે અપભ્રંશ ભાષાના અભ્યાસશીલ વાચક વર્ગને ઘણી ઘણી રીતે વિશિષ્ટપણે બોધક તથા ઉપકારક છે. જે માટે વૃત્તિકાર મહાપુરુષની અભ્યાસક વર્ગની જ્ઞાન ભૂખને સંતોષવા માટેની કાળજી તથા ચીવટ ખૂબ જ પ્રશંસનીય છે.

ત્રીજા વિભાગમાં સંક્ષિપ્ત 'પ્રાકૃત રૂપમાલા' સંકલિત થયેલ છે જે પ્રાકૃત ભાષાના અભ્યાસક આત્માઓને માટે સારી રીતે સહાયક બની શકે તેમ છે.

ઉપરોક્ત ત્રણેય વિભાગોથી સમૃદ્ધ "દોધક વૃત્તિ" નામનો આ ગ્રંથ જેનું સંપાદન શ્રુતના અભ્યાસી અને શ્રુત પ્રચારમાં પોતાના તન-મનને સમર્પિત કરીને અપૂર્વ ઉત્સાહ ધરાવનાર વિદ્વાન મુનિપ્રવર **શ્રી વજ્રસેનવિજયજી**

મહારાજશ્રીના નિષ્ઠા પૂર્વકના પ્રયત્નો તથા લાગણીનું અપ્રતીમ પ્રતીક છે.

પ્રાકૃત વ્યાકરણનું સર્વાંગ સુંદર સંપાદન-સંકલન કરીને, તેમણે તે ગ્રંથ પ્રકાશિત થાય, તે માટે પ્રશંસનીય પરિશ્રમ કરીને, પ્રાચીન ભારતીય ભાષાના સાહિત્ય પ્રચાર માટે, જે અપ્રતીમ નજરાણું અભ્યાસી વર્ગના કરકમલમાં ભેટ ધરેલ છે, તે તેમની સાહિત્ય સેવા ખરેખર ધન્યવાદને પાત્ર બને છે. સાથે દોધક વૃત્તિ સહિત આ વિભાગો પ્રાકૃત આદિ ભાષાના જ્ઞાનને સંપાદન કરનારાં સ્વાધ્યાયશીલ વર્ગને માટે, સંકલિત-સંયોજિત કરીને અત્રે મૂકેલ છે તે માટે તે ભાષાના અભ્યાસી આત્માઓ તેમને અવશ્ય યાદ કરશે જ.

**આચાર્યશ્રી વિજય કનકચંદ્રસૂરી.**
વિદ્યાશાળા-અમદાવાદ
ચૈ. વદ-૧૦ ૨૦૩૮

# સંપાદકીય

પ્રાકૃત ભાષા ભણવા માટે સરળતા થાય, તે હેતુથી વિ.સં. ૨૦૩૬નાં પાટણ ચાતુર્માસ દરમ્યાન વિચાર ઉત્પન્ન થયો કે, પૂ. કલિકાલ સર્વજ્ઞ શ્રી હેમચંદ્રાચાર્યજીનું પ્રાકૃત વ્યાકરણ, જે હાલ ઉપલબ્ધ નથી તેને પ્રગટ કરવું.

પરમ વાત્સલ્યનિધિ સ્વ. પ. પૂ. મ. શ્રી ભદ્રંકર વિજયજી ગણીવરશ્રીનાં શિષ્ય રત્ન પ. પૂ. પં શ્રી પ્રદ્યોતન વિજયજી ગણિવરશ્રી (વર્તમાન પૂ. આ. મ. શ્રી પ્રદ્યોતન સૂ. મ.)ને મારી ભાવના દર્શાવી. તેઓશ્રીએ મને આ કાર્યમાં આશીર્વાદ આપ્યા અને આ કાર્યનો શુભ પ્રારંભ થયો. વિ.સં ૨૦૩૭નું ચાતુર્માસ પ. પૂ. વિદ્વદ્વર્ય મુનિરાજ શ્રી જંબૂ-વિજયજી મ. શ્રીની સાથે થયું. તેઓશ્રી મને પ્રેરણા કરી કે— 'પ્રાકૃત વ્યાકરણ સાથે તેમાં ઉપયોગી બીજા વિષયો પણ પરિશિષ્ટ રૂપે મુકાય, તો વધુ ઉપયોગી થશે. આથી તેઓશ્રીની સૂચના મુજબ પ્રાકૃત વ્યાકરણ સાથે શબ્દ સૂચિ, ઉદાહરણની અકારાદિ સૂચિ, સંસ્કૃત છાયા તથા શકય મૂળ સ્થાનો સાથે ઉદાહરણો તથા અપભ્રંશ ભાષાનાં વ્યાકરણમાં આવતાં દોહાની પ્રાચીન વૃત્તિ તથા સંક્ષિપ્ત રૂપાવલિ સહિત લગભગ ૬૦૦ પેઇજનું પુસ્તક તૈયાર કર્યું તેમાંથી પૂ. સાધુ સાધ્વીજી મ. ને ઉપયોગી બને તે હેતુથી આ અલગ પુસ્તક તૈયાર કરેલ છે.

૧ ઉદાહરણોની સૂચિ તૈયાર કરવામાં પ. પૂ. મુનિરાજ શ્રી જંબૂવિજયજી મ. શ્રીએ પોતાનાં અમૂલ્ય સમયનો ભોગ આપીને ઘણી રીતે મને સહાય કરી છે.

૨ દોધક વૃત્તિની એક આવૃત્તિ પાટણનાં એક સુશ્રાવક તરફથી વર્ષો પહેલાં છપાયેલ તેનાં આધારે તૈયાર કરી છે.

૩ રૂપ માલા પ. પૂ. આ. મ. શ્રી ચન્દ્રોદયસૂરીશ્વરજી મ.ની "સંક્ષિપ્ત પ્રાકૃત રૂપ માલા"નાં આધારે તેઓશ્રીની સંમતિ પૂર્વક તૈયાર કરી છે.

પરમ હિત વત્સલ પરમ કૃપાળુ અરિહંત ભગવંતો તથા પ. પૂ. પ્રવચન પ્રભાવક આ. મ. **શ્રી રામચંદ્રસુરિશ્વરજી મ, પ. પૂ. સ્વ. પંન્યાસજી મ. શ્રી. ભદ્રંકર વિજયજી ગણિવર શ્રી. પ. પૂ. આ. મ. શ્રી પ્રદ્યોતન સૂ. મ. શ્રી. તથા પ. પૂ. આ. મ. શ્રી કુંદકુંદ સૂ.મ. આદિની** અપૂર્વ કૃપા જ આ કાર્યમાં મુખ્ય અવલંબન રૂપ બનેલ છે.

આ સિવાય આ કાર્યમાં; **મુનિ શ્રી રત્નસેન વિજયજી, પં. શ્રી શિવલાલભાઇ** (પાટણ) **પં. શ્રી. રતિલાલભાઈ** (અમદાવાદ) આદિ એ પણ મને આ કાર્યમાં સહાય કરી છે.

પ્રાંતે આવા કાર્યોમાં મારો પ્રથમ પ્રયાસ હોવાથી ઘણી ક્ષતિઓ થવા સંભવ છે. તે ક્ષતિઓ સજ્જન પુરુષો મને બતાવે તેવી આશા સાથે ભવિષ્યમાં આવા કાર્યો કરી શકું એવી દેવ અને ગુરૂને પ્રાર્થના કરીને વિરમું છું.

**મુનિ વજ્રસેન વિજય**

# અનુક્રમણિકા

| | |
|---|---|
| સંસ્કૃત છાયા સહિત ઉદાહરણ સૂચિ | I |
| દોધક વૃત્તિ. | 36 |
| સંક્ષિપ્ત પ્રાકૃત શબ્દ રૂપાવલિ. | 87 |
| સંક્ષિપ્ત પ્રાકૃત ધાતુ રૂપમાલા | 135 |

# સમર્પણ

પ.પૂ. પરમ વાત્સલ્ય નિધિ પં.શ્રી **ભદ્રંકર વિજયજી** ગણીવર કે—જેઓએ મને આ સંયમ રત્ન આપ્યું–ગ્રહણ શિક્ષા આસેવન શિક્ષા દ્વારા મને સંયમમાં સ્થિર કરીને આગળ વધાર્યો તે મારા પરમ ગુરૂદેવને

તથા

પ. પૂ. આ. મ. **શ્રી કુંદકુંદસૂરીજી** મ. કે જેઓ હું સંયમમાં સર્વ રીતે કેમ આગળ વધુ એની સતત હિત ચિંતા કરી રહ્યા છે એવા મારા ગુરુદેવને

તથા

પ. પૂ. મુનિરાજ **શ્રી મહાસેન વિજયજી** મ. કે જેઓએ મને સંયમ ખૂબ જ ઉલ્લાસથી અપાવ્યું તે મારા પિતા ગુરુદેવને

સાદર સમર્પણ કરીને કિંચિંદ્ ઋણ મુક્તિનો ભાવ અનુભવું છું.

**વજ્રસેન વિજય**



પ. પૂ. અધ્યાત્મમૂર્તિ સૂક્ષ્મતત્ત્વચિંતક
પંન્યાસ શ્રી ભદ્રંકર વિજયજી ગણીવર

प्राकृत व्याकरणवृत्तौ ग्रन्थान्तरेभ्य उद्धृतानां
संस्कृतच्छायया सहितानां गद्यपद्यात्मकानाम्

# उदाहरणानां सूचिः

卐

अत्रेदमवधेयम्—आचार्यश्रीहेमचन्द्रसूरिपादैः प्राकृत-व्याकरण-वृत्तौ ग्रन्थान्तरेभ्य उद्धृत्य बहूनि गद्यपद्यात्मकानि उदाहरणानि प्रति-उदाहरणानि प्रदर्शितानि। तानि अत्र पादक्रमेण सूत्रक्रमेण च निर्दिष्टानि। तेषां संस्कृतच्छाया (= ) एतादृश-कोष्ठकान्तरस्माभिर्निर्दिष्टा। तेषां मूलस्थानानि अपि यानि यानि अस्माभिर्गवेषयित्वा लब्धानि तानि तत्र तत्र निर्दिष्टानि। यत्र उदाहृतपाठाः अपूर्णाः तत्र ग्रन्थान्तरादिसाहाय्येन अपूर्णाः पाठाः [ ] एतादृशकोष्ठकान्तरवशिष्टं पाठं निवेश्यास्माभिः परिपूरिताः। उदाहृत वाक्यादिषु यावानंश उदाहरण-प्रति-उदाहरणरूपः स तत्र तत्र स्थूलाक्षरैर्निर्दिष्टः।

चतुर्थे पादे ४३० तमसूत्रतो यानि अपभ्रंशभाषात्मकानि दोधकरूपाणि उदाहरणानि आचार्यश्रीहेमचन्द्रसूरिपादैर्निर्दिष्टानि तत्र अस्माभिः संस्कृतच्छाया न दत्ता, किन्तु विक्रम संवत् १६७२ वर्षे केनचित् प्राचीनेन विदुषा विरचिता तेषां दोधकानां वृत्तिरेव अस्माभिरक्षरश उपन्यस्ता।

## प्रथमः पादः

सूत्रम्—

४ निअम्बसिल-खलिअ-वीइ-मालस्स

(=नितम्बशिला-स्खलित-वीचि-मालस्य)

६ [भीय-परित्ताण-मइं पइण्णमसिणो तुहाधिरूढस्य ।
मन्ने संका-विहुरे ] न वेरि-वग्गे वि अवयासो ॥

गउडवहे गाथा २२०

(=भीत-परित्राण-मयीं प्रतिज्ञामसेः तवाधिरूढस्य ।
मन्ये शङ्का-विधूरे न वैरि-वर्गेऽप्यवकाशः ॥)

६ [1]वन्दामि अज्जवइरं

( =वन्दे आर्यवज्रम् । )

---

१. श्री महावीर जैन विद्यालयप्रकाशिते नन्दिसूत्रे पृ० ६ मध्ये ईदृशं टिप्पणं विद्यते—

११ अष्टाविंशतितमगाथानन्तरं शु० प्रतिं विना सर्वास्वपि सूत्रप्रतिषु गाथायुगलमिदमधिकमुपलभ्यते—

**वंदामि** अज्जधम्मं वंदे तत्तो य भद्दगुत्तं च ।
तत्तो य **अज्जवइरं** तवनियमगुणेहिं वयरसमं ॥

वंदामि अज्जरक्खियखमणे रक्खियचरित्तसव्वस्से ।
रयणकरंडगभूए अणुयोगो रक्खिओ जेहिं ॥

६ दणइन्द-रुहिर-लित्तो सहइ-उइन्दो नह-प्पहावलि-अरुणो।
संझा-वहु-अवऊढो णव-वारिहरो व्व विज्जुला-पडिभिन्नो॥
( दनुजेन्द्र-रुधिर-लिप्तः शोभते उपेन्द्रः [ कृष्णः ]
नख-प्रभावल्यरुणः।
सन्ध्या-वधूपगूढो नव-वारिधर इव विद्युत्प्रतिभिन्नः ॥ )

६ [रक्खउ वो रोम-लया माया महिलत्तणे महुमहस्स । ]
गुढोअर-तामरसाणुसारिणी [1]भमर-पन्ति व्व ॥
गउडवहे गाथा १८
(=रक्षतु वो रोम-लता माया-महिलात्वे मधुमथनस्य ।
गूढोदर-तामरसानुसारिणी भ्रमर-पङ्क्तिरिव ॥)

७ वहुआइ नहुल्लिहणे आबन्धतीएँ कञ्चुअं अङ्गे ।
मयरद्धय-सर-धोरणि-धारा-छेअ व्व दीसन्ति ॥
(=वध्वा नखोल्लेखने आबध्नत्या कञ्चुकमङ्गे ।
मकरध्वज-शर-धोरणि-धाराच्छेदा इव दृश्यन्ते ॥ )

७ उवमासु अपज्जत्तेभ-कलभ-दन्तावहासमुरुजुअं ।
तं चेव मलिअ विस-दण्ड-विरसमालक्खिमो एण्हि ॥
गउडवहे गाथा १८८
(=उपमासु अपर्याप्तेभ-दन्तावभासमूरु–युगम् ।
तदेव मृदित-बिस-दण्ड-विरसमालक्षयामह इदानीम् ॥)

७ अहो अच्छरिअं ।
( =अहो आश्चर्यम् । )

---

१. 'भमरमाल्लव्व' इति गउडवहे पाठः ॥

७ अत्थालोअण तरला इअर-कईणं भमन्ति बुद्धीओ ।
अत्थच्चेअ निरारम्भमेन्ति हिअयं कइन्दाणं ॥

गउडवहे गाथा ८६

(=अर्थालोकन-तरला इतर-कवीनां भ्रमन्ति बुद्धयः ।
अर्था एव निरारम्भं यन्ति हृदयं कवीन्द्राणाम् ॥)

८ विससिज्जन्त महा-पसु-दंसण-संभम-परोप्परारूढा ।
गयणे च्चिअ गन्ध-उडिं कुणन्ति तुह कउल-णारीओ ॥

गउडवहे गाथा ३१९

(=विशस्यमान-महा-पशु-दर्शन-संभ्रम-परस्परारूढाः ।
गगने एव गन्धपुटिं कुर्वन्ति तव कौल-नार्यः ॥)

२४ उसभमजियं च वन्दे [संभवमभिणंदणं च सुमइं च ।
पउमप्पहं सुपासं जिणं च चंदप्पहं वन्दे ॥]

आवश्यकसूत्रे चतुर्विशतिस्तवे गाथा २

(=ऋषभमजितं च वन्दे सम्भवमभिनन्दनं च सुमतिं च ।
पद्मप्रभं च सुपार्श्वं जिनं च चन्द्रप्रभं वन्दे ॥)

२६ [सिद्धे भो पयओ णमो जिणमए णंदि सया संजमे ]
देवं नाग सुवण्ण[किन्नर गण सब्भूअ-भावच्चिए ।
लोगो जत्थ पइट्ठिओ जगमिणं तेलुक्कमच्चासुरं ।
धम्मो वड्ढउ सासओ विजयओ धम्मुत्तरं वड्ढउ ॥]

आवश्यकसूत्रे श्रुतस्तवे गाथा ४

(=सिद्धाय भो प्रयतः नमः जिनमताय नन्दिः सदा संयमे,
देव-नाग-सुवर्ण-किन्नर-गण-सद्भूत-भावार्चिते ।

लोकः यत्र प्रतिष्ठितः जगत् इदम् त्रैलोक्य-मर्त्यासुरम्,
धर्मः वर्धतां शाश्वतः विजयतः धर्मोत्तरं वर्धताम् ।। )

**३३ अज्जवि सो सवइ ते अच्छि ।।**
(=अद्यापि तत् स्रवति तेऽक्षि । )

**३३ नच्चावियाइँ तेणम्ह अच्छीइं ।।**
(=नर्तितानि तेनास्माकमक्षीणि । )

**३६ बाहाए जेण धरिओ एक्काए ।।**
(=बाहुना येन एकेन धृतः । )

**३६ वामेअरो बाहू**
(=वामेतरः बाहुः । )

**३८ ओमालयं वहइ**
(=निर्माल्यं वहति । )

**४२ इअ विञ्झगुहा-निलयाए ।।**
(=इति विन्ध्यगुफानिलयया । )

**६० अन्तो विसम्भनिवेसियाणं ।।**
(=अन्तः विस्रम्भनिवेशितानाम् । )

**६६ [वेलालाण-णिअलिओ रसिउणरसाअलट्ठिअं पि समुद्दो ।**
**वालेइ सेउबन्धं खम्भं ] आरण्णकुञ्जरो व्व [1]वेल्लन्तो ।।**
**सेतुबंधे आश्वासः ८ गाथा ५९**
(=वेलालाननिगलितो रसित्वा रसातलस्थितमपि समुद्रः ।
चालयति सेतुबन्धं स्तम्भमारण्यकुञ्जर इव रममाणः ।।)

---

१. 'वलन्तो' इति सेतुबन्धे पाठः ।

७६ **असहेज्ज देवासुरा**

(=असाहाय्याः देवासुराः ।)

८२ **बाह-सलिल-पवहेण उल्लेइ ॥**

(=बाष्प-सलिल-प्रवाहेण आर्द्रयति ॥ )

८४ **दिट्ठिक्क-थणवट्टं ॥**

(=दृष्टैकस्तनपट्टम् । )

८८ **पन्थं किर देसित्ता [साहूणं अडविविप्पणट्ठाणं ।**

**सम्मत्त-पढमलंभो बोद्धव्वो वद्धमाणस्स ॥]**

श्री आवश्यकनिर्युक्तौः गाथा १४६

(=पन्थानं किल दर्शयित्वा साधूनां अटविविप्रनष्टानाम् ।

सम्यक्त्वप्रथमलाभः बोद्धव्यः वर्धमानस्य ॥ )

६१ **इअ जम्पिआवसाणे ॥**

(=इति जल्पितावसाने । )

**इअ विअसिअ-कुसुम-सरो ॥**

(=इति विकसित-कुसुम-शरः । )

६३ **निस्सहाइं अङ्गाइं**

(=निःसहानि अङ्गानि । )

६७ **दुहा वि सो सुर-वहू-सत्थो ॥**

(=द्विधाऽपि स सुरवधू-सार्थः ।)

१०२ **जीण्णे भोअणमत्तेओ**

(=जीर्णे भोजनमात्रेयः कपिलः प्राणिनां दया ।

बृहस्पतिरविश्वासः पाञ्चालस्त्रीषु मार्दवम् ॥ )

इति संपूर्णः श्लोकः ।

१०३ एवं मए अभिथुआ विहुअरयमला] पहीणजरमरणा।
[चउवीसंपि जिणवरा तित्थयरा मे पसीयन्तु ॥ ]
आवश्यकसूत्रे चतुर्विंशतिस्तवे गाथा ५

(=एवं मया अभिष्टुता विधूत-रजो-मलाः प्रहीण-जरा-मरणाः।
चतुर्विंशतिरपि जिनवराः तीर्थंकराः मे प्रसीदन्तु ॥ )

१२६ पिट्ठिपरिट्ठविअं।
(=पृष्ठपरिस्थापितम्।)

११५ दुस्सहो विरहो
(=दुःसहो विरहः। )

१४४ [मम धम्मिय वीसत्थो सो सुअणो अज्ज मारिओ तेण
गोल्लायडविअडकुडङ्गवासिणा] दरिअ सीहेण
गाथा सप्तशत्याम् २-७५

(=मम धार्मिकः विस्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदा तटविकट कुञ्जवासिना दृप्तसिंहेन ॥)

१४५ किलिन्न-कुसुमोवयारेसु।
(=क्लृप्त-कुसुमोपचारेषु।)

१४५ धाराकिलिन्नवत्तं [आसुरहि कसाय केसरद्धंतं।
परिणमइ बन्धणुच्चिय परिजरठं जुहिया-कुसुमं ॥]
गउडवहे गाथा ४१०

(=धाराक्लिन्नपत्रं आसुरभिकषाय-केसर-ध्वान्तम्।
परिणमति बन्धनोच्चित-परिजरठं यूथिकाकुसुमम् ॥)

१४६ विअड-चवेडा-विणोआ।
(=विकट-चपेटा-विनोदाः।)

१४६ महमहिअ-दसण-किरणं ।
(=प्रसृत-दशन-किरणम् । )

१५५ धीरं हरइ विसाओ [विणयं जोव्वणमओ अणंगओ लज्जं ।
एक्कन्तगहिअ पक्खो किं सीसउ जं ठवेइ वअपरिणामो ॥]

सेतुबन्धे, आश्वासः ४ गाथा २३

(=धैर्यं हरति विषादः विनयं यौवनमदोऽनङ्गो लज्जाम् ।
एकान्तगृहीतपक्षः किं शिष्यतां यत्स्थापयति वयःपरिणामः ।।)

१६६ [फुल्लुकरं कलमकूरसमं वहन्ति,
जे सिंदुवार-विडवा मह वल्लहा ते ।
जे गालिअस्स महिसीदहिणो सरिच्छा,
ते किं च ] मुद्धविअइल्लपसूणपुञ्जा ॥

कर्पूरमञ्जर्याम् १–१९

(=पुष्पोत्करं कलमकूरसमं वहन्ति,
ये सिन्दुवारविटपा मम वल्लभास्ते ।
ये गालितस्य महिषीदध्नः सदृक्षा–
स्ते किं च मुग्ध-विचकिलप्रसूनपुञ्जाः ।। )

१६९ ऐ बीहेमि । अइ उम्मत्तिए ।
(=अयि बीमेमि । अयि उन्मत्तिके ! )

१७१ तह मन्ने कोहलिए
(=तथा मन्ये कुतूहलिके ! )

१७७ **लोगस्स उज्जोयगरे [धम्मतित्थयरे जिणे ।**
**अरिहंते कित्तइस्सं चउवीसंपि केवली ॥]**
**आवश्यकसूत्रे चतुर्विंशतिस्तवे गाथा १**
(=लोकस्योद्योतकरान् धर्मतीर्थंकरान् जिनान् ।
अर्हतः कीर्तयिष्यामि चतुर्विंशतिम् अपि केवलिनः )

१७७ [1]**आउण्टणं इति आर्षे ।**
(=आकुञ्चनम् । )

१८१ **बंधेउं कुज्जय-पसूणं ।**
(=बद्ध्वा कुब्जक–प्रसूनं)

१८१ [2]**खासियं इति आर्षे ।**
(=कासितं)

१८३ **नमिमो हर किरायं ।**
(नमामो हर-किरातम् ॥)

१९९ **हिअए ठाइ ।**
( =हृदये तिष्ठति)

२३८ **बिस-तन्तु-पेलवाणं ।**
( =बिसतन्तु पेलवानाम् ॥)

---

१. इच्छामि पडिक्कमिउं पगामसिज्जाए निगामसिज्जाए ।
संथाराउव्वट्टणाए परिअट्टणाए **आउण्टणाए** ॥
**आवश्यकसूत्रे प्रतिक्रमणाध्ययने**

२. अन्नत्थ उससिएणं निससिएणं **खासिएणं**........॥
**इति आवश्यक सूत्रे कायोत्सर्गाध्ययने**

२४६ **जुम्हदम्हपयरणं ।**

(=युष्मदस्मत् प्रकरणं)

२५४ [1]**दुवालसङ्गे इति आर्षे ।**

२६६ **महण्णव समासहिया ।**

( = महार्णव-समाः सहृदयाः ।। )

२६६ [ ताला जायन्ति गुणा ] जाला ते **सहिअएहिं घेप्पंति !**

[ रविकिरणाणुग्गहिआइं होन्ति **कमलाइं कमलाइं** ।। ]

( = तदा जायन्ते गुणाः यदा ते सहृदयैः गृह्यन्ते !

रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ।। )

२६६ निसमणुप्पिय-**हिअस्स हिअअं** ।

( = निशमनार्पित हृदयस्य हृदयं ।। )

## द्वितीयपादः

**सूत्र—**

१५ **भोच्चा सयलं पिच्छिं विज्जं बुज्झा अणण्णयग्गामि**

**चइउण तवं काउं सन्ती पत्तो सिवं परमं ।।**

**आ० श्री देवचन्द्रसूरिकृत शांतिनाथ चरित्रे**

( = भुक्त्वा, सकलां पृथ्वीं विद्वान् बुद्ध्वा अनन्यकगामी ।

त्यक्त्वा, तपः कृत्वा शान्तिः प्राप्तः शिवं परमं ।। )

४० **विप्प-कइ-निरुविअं ।**

( = वृद्धकविनिरूपितं ।। )

---

१. इच्चेइयम्मि **दुवालसंगे** गणिपिडगे........।।

**इति श्री नन्दिसूत्रे सूत्र ११५.**

[विरला जाणंति गुणा, विरला पिच्छंति अत्तणो दोसे।
विरला परकज्जकरा, [ पर दुक्खे दुक्खिआ विरला ॥
इति सम्पूर्ण श्लोकः।
(=विरलाः जानन्ति गुणान्, विरलाः पश्यंति आत्मनः दोषान्।
विरलाः परकार्यकराः, परदुःखे दुःखिता विरलाः ॥ )

८० [सिक्करिअ-मणिअ-मुह-वेविआइँ धुअ-हत्थ-सिञ्जिअव्वाइं]
सिक्खंतु वोड(द्र)हीओ [कुसुम्भ तुम्ह प्पसाएण॥ ]
गाथा सप्तशत्याम् ४-३२
( = सीत्कृतमणितमुखवेपितानि धूतहस्तशिञ्जितव्यानि।
शिक्षन्तां कुलबालाः कुसुम्भ युष्मत्प्रसादेन ॥ )

८० [ते चिय धण्णा ते चिय सप्पुरिसा ते जियन्तु जिय-लोए।]
वोद्रह-द्रहम्मि पडिया [ तरंति जे चेव लीलाए ॥]
परमात्म प्रकाशे २–११७
( =ते चैव धन्याः ते चैव सत्पुरुषाः ते जीवन्तु जीवलोके।
यौवन-द्रहे पतिताः तरन्ति ये चैव लीलया ॥)

९७ मलय-सिहर-क्खण्डं ।
( =मलय-शिखर-खण्डं ।

१०४ हयं नाणं क्रिया-हीणं [हया अन्नाणओ क्रिया।
पासंतो पंगुलो दड्ढो धावमाणो य अंधओ ॥ ]
आवश्यकनिर्युक्तौः गाथा १०१
( =हतं ज्ञानम् क्रिया-हीनं हता अज्ञानतः क्रिया।
पश्यन् पङ्गुः दग्धः धावमानश्च अन्धः ॥ )

१२० **हरए महपुण्डरिए ।**
( = ह्रदो महापुण्डरीकः । )
१२६ **चिंच व्व कूर पिक्का ।**
( = चिञ्चा इव इषत्पक्वा । )
१४३ **तिरिच्छि पेच्छइ ।**
( = तिर्यक् प्रेक्षते । )
१५० **महुरव्व पाडलिउत्ते पासाया ।**
( = मथुरावत् पाटलिपुत्रे प्रासादाः ।
१५५ **सुरहि-जलेण [1]कडुएल्लं ।**
( = सुरभि-जलेन कडुतैलम् । )
१६४ **[ ससिमऊहपडिपेल्लणपक्खुभंतयं,**
**संचरन्त ] धरणीहर पक्खुब्भंतअम् ।**
**[ धीरअं सइमुहलघण विज्जन्तअं,**
**अट्ठिअं च वलआणलपअविज्जन्तअम् ॥ ]**
**सेतुबन्धे २-२४**
( = शशिमयूखपरिप्रेरणप्रक्षुभ्यत्कं,
संचरद्धरणीधरप्रक्षोभ्यमाणम् ।
धैर्यकं सदा मुखरघनपीयमान,-
मस्थितं च वडवानलप्रताप्यमानम् ॥ )

---

१. 'कटु' शब्देन अत्र राजिका ग्राह्या ! 'राई' इति भाषायाम् ।
कट्वकार्ये मत्सरे च दूषणे च कटू रसे ।
तिक्ते प्रियङ्गुसुरभिकटुकाराजिकास्वपि ॥".
**अनेकार्थसङ्ग्रहकोषे द्वितीयकाण्डे श्लोक ८१**

१६४ दुहिअए राम-हिअयए ।
( = दुःखितके रामहृदयके )
१६४ णिज्जिआसोअ-पल्लविल्लेण ।
( = निर्जिताशोक-पल्लवेन । )
१६८ सणियमवगूढो ।
( = शनैः अवगूढः )
१७४ मन्दरयड-परिघट्टं ।
( = मन्दरतट-परिघृष्टम् )
१७४ तद्दिअस-णिहट्टाणङ्ग ।
( = तद्दिवसनिघृष्टानङ्गः )
१७४ सुअ-लक्खणाणुसारेण वक्कन्तरेसु अ पुणो ।
( = श्रुत-लक्षणानुसारेण वाक्यान्तरेषु च पुनः )
१७६ तं तिअस बन्दिमोक्खं [समत्थतेल्लोक्कहिअअसल्लुद्धरणम् ।
सुणह अणुराअइण्हं सीआदुक्खक्खयं दहमुहस्स वहम् ।।]
सेतुबन्धे १-१२
( = तं त्रिदशबन्दिमोक्षं समस्तत्रैलोक्यहृदयशल्योद्धरणम् ।
श्रृणुतानुरागचिह्नं सीतादुःखक्षयं दशमुखस्य वधम् ।। )
१७७ आम बहला वणोली [मुहला[1] जलरङ्कुणो जलं सिसिरम् ।
अण्णणईणँ वि रेवाइ तह वि अन्ने गुणा के वि ।। ]
गाथा सप्तशत्याम् ६-७८
( = सत्यं बहुला वनाली मुखरा जलरङ्कवो जलं शिशिरम् ।
अन्यनदीनामपि रेवायास्तथाप्यन्ये गुणाः केऽपि )

१. रङ्कुः पक्षिविशेषः ।।

१७९ अइ सुप्पइ पंसुलि णीसहेहिं अङ्गेहिं पुणरुत्तं।

( = अयि स्वपिति पांसुली निस्सहैः अङ्गैः पुनरुक्तम् )

१८० हन्दिचलणे णओ सो ण माणिओ हन्दि हुज्ज एत्ताहे।

हन्दि न होही भणिरी सा सिज्जइ हन्दि तुह कज्जे।)

( = हन्दि चरणे नतः सः, न मानितः हन्दि भवेत् इदानीम्। हन्दि न भविष्यति भणिका, सा खिद्यति हन्दि तव कार्ये॥ )

१८१ हन्द पलोएसु इमं।

( = हन्द प्रलोकस्व इमाम् )

१८२ खीरोओ सेसस्स व निम्मोओ।

( = क्षीरोदः शेषस्य इव निर्मोकः )

१८२ नीलुप्पलमाला इव।

( = नीलोत्पलमाला इव )

१८३ भमर-रुअं जेण कमल-वणं।

( = भ्रमर-रुतं तेन कमलवनम् )

१८४ जं चेअ मउलणं लोअणाणं।

( = यत् चैव मुकुलनं लोचनानाम् )

१८४ अणुबद्धं तं चिअ कामिणीणं।

( = अनुबद्धं तदेव कामिनीनाम् )

१८४ ते च्चिय धन्ना ते च्चेअ सप्पुरिसा

(ते चैव धन्याः ते चैव सत्पुरुषाः।)

परमात्मप्रकाशे २-११७

१८४ स च्च य रूवेण स च्च सीलेण ।
( = सः एव च रूपेण सः एव शीलेन । )

१८५ बले पुरिसो धणंजओ खत्तिआणं ।
( = बले पुरुषः धनञ्जयः क्षत्रियाणाम् । )
( क्षत्रियाणां मध्ये धनञ्जय एव पुरुषः )

१८६ कल्लं किर खर-हिअओ ।
( = कल्यं किल खरहृदयः )

१८६ एवं किल तेण सिविणए भणिआ ।
( = एवं किल तेन स्वप्नके भणिता )

१८७ णवर पिआइं चिअ णिव्वडन्ति ।
( = केवलं प्रियाणि एव निष्पतन्ति )

१८८ णवरि अ से रहु-वइणा ।
( = पश्चात् च तस्य रघुपतिना । )

१८९ अलाहि किं वाइएण लेहेण ।
( = अलम् किं वाचितेन लेखेन । )

१९० अणचिन्तिअमगुणन्ती ।
( = अचिन्तिम् अजानतो । )

१९० णाइं करेमि रोसं ।
( = न करोमि रोषम् )

१९३ वेव्वे त्ति भये वेव्वे त्ति वारणे जूरणे अ वेव्वे त्ति ।
उल्लाविरीइ वि तुहं वेव्वे त्ति मयच्छि किं णेअं ॥

( = वेव्वे इति भये, वेव्वे इति वारणे; जूरणे (विषादे)
च वेव्वे इति ।
उल्लापयन्त्या अपि तव, वेव्वे इति मृगाक्षि ! किं ज्ञेयम् ।।)

१९३ **कि उल्लावेन्तीए उअ जूरन्तीए किं नु भीआए ।**
**उव्वाडिरीए वेव्वे त्ति तीए भणिअं न विम्हरिमो ।।**

( = किम् उल्लापयन्त्या उत जूर्यमाणया किं नु भीतया ।
उव्वाडिरोए वेव्वे इति तया भणितं न विस्मरामः ।।)

१९४ **वेव्वे मुरन्दले वहसि पाणिअं ।**

( = वेव्वे मुरन्दले ! (त्वं) वहसि पानीयम् ।।)

१९५ **मामि सरिसक्खराणवि ।**

( = सखि ! सदृशाक्षराणामपि । )

१९५ **पणवह माणस्स हला ।**

( = प्रणमत मानस्य सखि ! )

१९५ **हले हयासस्स**

( = सखि ! हताशस्य )

१९५ **सहि एरिसिच्चिय गइ ।**

( = हे सखि ! ईदृशी एव गतिः । )

१९६ **दे पसिय ताव सुन्दरि ।**

( = हे सुन्दरी ! प्रसीद तावत् )

१९६ **दे आपसिय नियत्तसु ।**

( = हे सखि ! आप्रसद्य निवर्तस्व । )

---

१. अत्र हस्तलिखितादर्शेषु 'किं नु' इति 'किं तु' इति च पाठद्वयमुपलभ्यते ।

१६७ हुं गेण्ह अप्पणो च्चिय ।
( = हुं गृहाण आत्मन एव । )

१६७ हुँ साहसु सब्भावं ।
( = हुं कथय सद्भावम् । )

१६७ हुं निल्लज्ज समोसर ।
( = हुं निर्लज्ज समपसर । )

१६८ तं पि हु अच्छिन्नसिरी ।
( = त्वमपि हु अच्छिन्नश्रीः । )

१६८ तं खु सिरीए रहस्सं ।
( = तत् खु श्रियाः रहस्यम् । )

१६८ न हु णवरं संगहिआ ।
( = न हु णवरं संगृहीता । )

१६८ एअं खु हसइ ।
( = सम्भावयामि, एतां हसति । )

१६८ जलहरो खु धूमवडलो खु
( = जलधरो वा धूमपटलो वा । )

१६८ तरीउं न हु णवर इमं ।
( = केवल मिमं तरीतुं न संभावयामि । )

१६८ को खु एसो सहस्ससिरो ।
( = आश्चर्यम्, क एषः सहस्रशिराः । )

१६९ ऊ किं मए भणिअं ।
( = ऊ किं मया भणितम् । )

१९८ ऊ कह मुणिआ अहयं।
(= ऊ कथं ज्ञाता अहं।)

१९९ ऊ केन न विण्णायं।
(= ऊ केन न विज्ञातम्।)

२०० थू निल्लज्जो लोओ
(= थू निर्लज्जः लोकः।)

२०१ रे हिअय मडह-सरिआ[1]।
(= रे हृदय!)

२०१ अरे मए समं मा करेसु उवहासं।
(= अरे मया समं मा कुरु उपहासं।)

२०३ ओ अविणय-तत्तिल्ले।
(= ओ अविनयपरायणे।)

२०३ ओ न मए छाया इत्तियाए[2]।
(= ओ न मम छाया एतावत्याः।)

२०३ ओ विरएमि नहयले।
(= ओ विरचयामि नभस्तले।)

---

१. 'मडहसरिया' इत्यस्य 'लघ्वी सरिता' 'लघ्वी माला' इति चार्थद्वयं भाति। यदि च 'मडहसिरिया' इति पाठान्तरं स्वीक्रियेत तदा 'लघ्वी श्रीः' इत्यर्थो भाति॥

२. यदि 'छायाइत्तियाए' इति एकं पदमत्राभिप्रेतं तदा 'न मम छायावत्याः' इत्यर्थोऽपि अत्र भवेत्॥

२०४ **अव्वो दुक्करकारय, [पुणो वि तन्ति करेसि गमणस्स ।**
**अज्ज वि ण होन्ति सरला, वेणीअ तरङ्गिणो चिउरा ॥ ]**

**गाथा सप्तशत्याम् ३-७३**

( = अव्वो दुष्करकारक: पुनरपि चिन्तां करोषि गमनस्य ।
अद्यापि न भवतिं सरला वेण्यास्तरङ्गिणश्चिकुरा: । )

२०४ **अव्वो दलन्ति-हिययं ।**

( = अव्वो दलन्ति हृदयम् । )

२०४ **अव्वो किमिणं किमिणं ।**

( = अव्वो किमिदं किमिदम् । )

२०४ **अव्वोह रन्ति हिअयं, तह वि न वेसा हवन्ति जुवईण ।**
**अव्वो किंपि रहस्सं, मुणन्ति धुत्ता जणब्भहिआ ॥**

( = अव्वो हरन्ति हृदयं तथापि न द्वेष्या भवन्ति युवतीनाम् ।
अव्वो किमपि रहस्यं जानन्ति धूर्त्ता: जनाभ्यधिका: । )

२०४ **अव्वो सुपहायमिणं, अव्वो अज्जम्ह सप्फलं जीअं ।**
**अव्वो अइअम्मि तुमे, नवरं जइ सा न जूरिहिइ ॥**

( =अव्वो सुप्रभातमिदम् अव्वो अद्य अस्माकम् सत्फलं जीवितम्
अव्वो अतीते त्वयि नवरं यदि सा न जूरिष्यते ।। )

२०४ **अव्वो न जामि छेत्तं ।**

( = अव्वो न यामि क्षेत्रम् । )

२०४ **अव्वो नासेन्ति दिहिं, पुलयं वड्ढेन्ति देन्ति रणरणयं ।**
**एण्हिं तस्सेअ गुणा, ते च्चिय अव्वो कह णु एअं ॥**

(=अव्वो नाशयन्ति धृतिं पुलकं वर्धयन्ति ददति रणरणकम् ।
इदानीं तस्येति गुणाः ते एव अव्वो कथं नु एतत् ? ।)

२०४ अव्वो तह तेण कया अहयं जह कस्स साहेमि ।
( =अव्वो तथा तेन कृता अहं यथा कस्य कथयामि । )

२०५ अइ दिअर किं ण पेच्छसि, [आयासं किं मुहा पलोएसि ।
जाआइ बाहुमूलम्मि, अद्धअन्दाणं परिवाडिम् ॥ ]
गाथा सप्तशत्याम् ६-७०
( =अयि देवर किं न प्रेक्षसे, आकाशं किं मुधा प्रलोकयसि ।
जायायाः बाहुमूलेऽर्धचन्द्राणां परिपाटीम् ॥ )

२०६ नत्थि घणे जं न देइ विहि परिणामो ।
( =यद् नास्ति वणे यद् न ददाति विधिपरिणामः । )

२०८ अम्मो कह पारिज्जइ
(= अम्मो कथं पार्यते । )

२०६ विसयं विअसन्ति अप्पणो कमल-सरा ।
(= विशदं विकसन्ति स्वयमेव कमलसरांसि । )

२०६ सयं चेव मुणसि करणिउज्जं ।
(= स्वयमेव जानासि करणीयम् । )

२११ उअ निच्चल-निप्फंदा भिसिणी पत्तंमि रेहइ वलाया ।
निम्मल-मरगय-भायण-परिट्ठिआ सङ्ख-सुत्ति व्व ॥
गाथा सप्तशत्याम् १-४
(= पश्य निश्चलनिःस्पंदा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकत-भाजन-परिस्थिता शङ्खशुक्तिरिव ॥

२१२ इहरा नीसामन्नेहिं ।
(= इतरथा निःसामान्यैः । )

२१७ न उणा इ अच्छीइं ।
(= न पुनः अक्षीणि । )

२१७ गेण्हइ रे कलमगोवी ।
(= गृह्णाति रे कमलगोपी । )

## तृतीय पादः ।

७ वच्छेहिं कया छाही ।
(= वृक्षैः कृता छाया । )

१६ दिअ-भूमिसु दाण-जलोल्लिआइं ।
(= द्विज-भूमिसु दानजलार्द्रितानि । )

३८ जाइ विसुद्धेण पहू ।
(= जातिविशुद्धेन प्रभो ! । )

३८ दोण्णि पहू जिअ-लोए ।
(= द्वौ प्रभो जीव-लोके । )

६५ ताला जायन्ति गुणा, जाला ते सहिअएहिं घेप्पंति ।
रविकिरणाणुग्गहिआइं, होन्ति कमलाइं कमलाइं ॥[1]
(= तदा जायन्ते गुणाः यदा ते सहृदयैः गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलनि । )

---

१. दृश्यतां २।१६६ सूत्रवृत्तौ । अत्रापि ३।६५ सूत्रवृत्तौ अस्य श्लोकस्य पूर्वार्धमेवास्माभिः मुद्रितं किन्तु सम्पूर्णोऽप्ययं श्लोकः प्राकृतव्याकरणस्य प्राचीने हस्तलिखितादर्शे क्वचित् प्रतौ विद्यते ।

७० सोअइ अ णं रघुवई ।
(= शोचति च तं रघुपतिः । )

७० हत्थुन्नामियमुही णं तिअडा ।
(= हस्तोन्नामितमुखी तां त्रिजटा । )

७० तो णेण करयलट्ठिआ ।
(= ततः तेन करतलस्थिता । )

७३ अहवायं कयकज्जो ।
(= अथवा अयं कृतकार्यः । )

७३ इमिआ वाणिय धूआ ।
(= इयं वाणिजदुहिता । )

८५ सव्वस्स वि एस गई ।
(= सर्वस्य अपि एषा गतिः । )

८५ सव्वाण वि पत्थिवाण एस मही ।
(= सर्वेषाम् अपि पार्थिवानाम् एषा मही । )

८५ एस सहाओ च्चिय ससहरस्स ।
(= एषः स्वभावः एव शशधरस्य । )

८७ अह मोहो पर-गुण-लहुअयाइ ।
(= असौ मोहः परगुणलघुतायै । )

८७ अह णे हिअएण हसइ मारुअ तणओ ।
(= असौ तान् हृदयेन हसति मारुत-तनयः ( हनुमान् )

१३८ [ तमतिमिरपडलविद्धंसणस्स, सुरगणनरिंदमहिअस्स । ]
सीमाधरस्स वंदे [ पप्फोडिअ-मोह-ज़ालस्स ॥ ]

आवश्यकसूत्रे श्रुतस्तवे गाथा-२

(= तमस्तिमिर-पटल-विध्वंसनं सुरगण-नरेन्द्र-महितम् ।
सीमन्धरं वन्दे प्रस्फोटित-मोहजालम् ।। )

१३४ तिस्सा मुहस्स भरिमो ।
(= तस्याः मुखं स्मरामः । )

१३४ [ संजमे सुट्ठिअप्पाणं, विप्पमुक्काण ताइणं । ]
तेसिमेयमणाइन्नं, [ निग्गंथाण महेसिणं ।। ]
दशवैकालिकसूत्रे अध्ययनं ३ गाथा-१
(= संयमे सुस्थितात्मभिः विप्रमुक्तैः तायिभिः ।
तैरेतदनाचरितम् निर्ग्रन्थैः महर्षिभिः ।। )

१३४ इअराइं जाण लहुअक्खराइं पायन्तमिल्लसहियाण ।
(= इतराणि जानीहि लघ्वक्षराणि पादान्तिमसहितेभ्यः ।)

१३४ पिट्ठीए केस-भारो ।
(= पृष्ठ्यां केशभारः । )

१३५ गामे वसामि नयरे न यामि ।
(= ग्रामं वसामि नगरं न यामि । )

१३५ मइ बेविरीए मलिआइं ।
(= मया वेपमानया मर्दितानि । )

१३५ तिसु तेसु अलंकिआ पुहवी ।
(= तैः त्रिभिः अलंकृता पृथ्वी । )

१४१ बहुजाणय रूसिउं सक्कं ।
( = बहुज्ञायक ! रोषितुं शक्नोमि । )

१४२ गज्जन्ते खे मेहा ।
( = गर्जन्ति आकाशे मेघाः । )

१४२ बीहन्ते रक्खसाणं च ।
( = बीभ्यति राक्षसेभ्यः च । )

१४२ उप्पज्जन्ते कइ-हिअय-सायरे कव्व-रयणाइं ।
(=उत्पद्यन्ते कवि-हृदय-सागरे काव्यरत्नानि । )

१४२ दोण्णि वि न पहुप्पिरे बाहू ।
(=द्वौ अपि न प्रभवतः बाहू । )

१४२ सूसइरे गाम-चिक्खल्लो ।
( = शुष्यति ग्रामकर्दमः । )

१५३ हासाविओ जणो सामलीए, [पढमं पसूअमाणाए ।
वल्लहवाएण अलं, मम त्ति बहुसो भणन्तीए ॥

गाथा सप्तशत्याम् २-२३

(=हासितो जनः श्यामया प्रथमं प्रसूयमानया ।
वल्लभवादेनालं ममेति बहुशो भणन्त्या ।। )

१६२ देविन्दो इणमब्बवी ।

उत्तराध्ययनसूत्रे नमिप्रवज्याध्ययने

(= देवेन्द्रः इदम् अब्रवीत् । )

१७६ जइ होज्ज वण्णणिज्जो ।
(= यदि अभविष्यत् वर्णनीयः । )

१८० हरिण-ट्ठाणे हरिणङ्क जइ सि हरिणाहिवं निवेसन्तो ।
न सहन्तो च्चिय तो राहु परिहवं से जिअन्तस्स ॥
(= हरिणस्थाने हरिणाङ्क ! यदि असि हरिणाधिपं
न्यवेशयिष्यः ।
न असहिष्यथाः एव तदा राहुपरिभवं तस्य जीवतः ।।)

## चतुर्थ पादः

सूत्र—

६ **सद्दहमाणो जीवो ।**
(= श्रद्दधानः जीवः । )

२३ **दूमेइ मज्झ हियय ।**
(= दावयति मम हृदयम् । )

७८ **महमहइ मालई-गन्धो ।**
(= प्रसरति मालतीगन्धः । )

१५७ **केलिपसरो विअम्भइ ।**
(= केलिप्रसरः विजृम्भते । )

२२० **वड्ढइ पवयकलयलो ।**
(= वर्धते प्लवग-कलकलः । )

२२० **परिवड्ढइ लायण्णं ।**
(= परिवर्धते लावण्यं । )

२२४ सव्वङ्ग **सिज्जिरोए ।**
(= सर्वाङ्गस्वेदनशीलायाः । )

२६० **तदो पूरिद-पतिञ्ञेण मारुदिणा मन्तिदो ।**
(= ततः पूरित-प्रतिज्ञेन मारुतिना मन्त्रितः । )

२६० **तधा करेध जधा तस्स राइणो अणुकम्पणीया भोमि[1] ।**
(= तथा कुरु यथा तस्य राज्ञः अणुकम्पनीयो भवामि । )

---

१. तुला "तंजइ वो अणुमदं ता तह वट्टह जह तस्स राएसिणो अणुकम्पणिज्जा होमि" इति **अभिज्ञानशाकुन्तले तृतीयेऽङ्के पृ० ६४ ।**

२६० **असंभाविद-सक्कारं ।**

(= असंभावित-सत्कारम् । )

२६० **हला सउन्तले ।**

अभिज्ञानशाकुन्तले प्रथमेऽङ्के पृ० ३८

(= हे. शकुन्तले )

२६४ **भयवं कुसुमायुह ।**

( = भगवन् कुसुमायुध ! )

२६४ **भयवं तित्थं पवत्तेह ।**

कल्पसूत्रे पञ्चमेऽव्याख्याने

(= भगवन् तीर्थं प्रवर्त्तय । )

२६४ **सयल-लोअ-अन्तेआरि भयव हुदवह ।**

(= सकल-लोकान्तश्चारिन् भगवन् हुतवह ! )

२६५ **किं एत्थ भवं हिदयेण चिन्तेदि ।**

(= किम् अत्रभवान् हृदयेन चिन्तयति ? )

२६५ **एदु भवं ।**

अभिज्ञानशाकुन्तले द्वितीयेऽङ्के पृ० ६९

(= एतु भवान् । )

२६५ **समणे भगवं महावीरे ।**

कल्पसूत्रे सू० १

(= श्रमणः भगवान् महावीरः । )

२६५ **पज्जलिदो भयवं हुदासणो ।**

( = प्रज्वलितः भगवान् हुताशनः । )

२६५ **मघवं पागसासणे ।**

(= मघवा पाकशासनः । )

२६५ **संपाइअवं सीसो ।**

(= संपादितवान् शिष्यः । )

२६६ **अय्यउत्त पय्याकुलीकदम्हि ।**

(= आर्यपुत्र पर्याकुलीकृता अस्मि । )

२७० **अपुरवं नाडयं ।**

(= अपूर्वं नाटकम् । )

२७० **अपुरवागदं ।**

(= अपुर्वागतम् । )

२७७ **अनन्तरकरणीयं दाणिं आणवेदु अय्यो ।**

अभिज्ञानशाकुन्तले प्रथमेऽङ्के पृ० १०

(= अनन्तरकरणीयं इदानीम् आज्ञापयतु आर्यः । )

२७७ **अन्नं दाणिं बोहिं ।**

(= अन्याम् इदानीम् बोधिम् । )

२७८ **ता जाव पविसामि ।**

(= तस्माद् यावत् प्रविशामि । )

२७८ **ता अलं एदिणा माणेण ।**

(= तस्मात् अलं एतेन मानेन । )

१८० **मम य्येव बम्भणस्स ।**

(= मम एव ब्राह्मणस्य । )

२८० **सो य्येव एसो ।**

(= सः एव एषः ।

२८२ हीमाणहे जीवन्त-वच्छा मे जणणी ।
(=आश्चर्यं यत् जीवद्वत्सा मे जननी । )

२८२ हीमाणहे पलिस्सन्ता हगे एदेण नियविधिणो दुव्ववसिदेण ।
(=दुःखं यत् परिश्रान्ता वयम् एतेन निजविधेः दुर्व्यवसितेन ।)

२८३ णं अय्यमिस्सेहिं पुढमं य्येव आणत्तं ।
अभिज्ञानशाकुन्तले प्रथमेऽङ्के पृ. १३
(= ननु आर्यमिश्रैः प्रथमम् एव आज्ञप्तम् । )

२८३ णं भवं मे अग्गदो चलदि ।
अभिज्ञानशाकुन्तले द्वितीयेऽङ्के पृ. ६६
(= ननु भवान् मम अग्रतः चलति । )

२८४ अम्महे एआए सुम्मिलाए सुपलिगढिदो भवं ।
(=हर्षः यत् एतस्यां सुर्मिलायां सुपरिगृद्धः भवान् ।)

२८५ हीही भो संपन्नाः मणोरधा पियवयस्सस्स ।
(=हर्षः यत् संपन्नाः मनोरथाः प्रियवयस्यस्य । )

२८७ कयरे आगच्छइ ।
( = कतरः आगच्छति । )

२८७ से तारिसे दुक्खसहे जिइंदिए,[सुएण जुत्ते अममे अकिंचणे ।
विरायई कम्मघणम्मि अवगए कसिणब्भपुडावगमे व चंदिमे ॥]
दशवैकालिकसूत्रेऽष्टमे आचारप्रणिध्यध्ययने गा. ६३
(=स तादृशो दुःखसहो जितेन्द्रियः श्रुतेन युक्तोऽममोऽकिञ्चनः ।
विराजति कर्मघने अपगते कृत्स्नाभ्रपुटापगमे इव चन्द्रमाः ।

२८८ **लहश-वश-नमिल-शुल-शिल-विअलिद-मन्दाल-**
**लायिदंहि-युगे ।**
**वील-यिणे पक्खालदु मम शयलमवय्य-यम्बालं ॥**
( = रभस-वश-नम्र-सुर-शिरः-विगलित-मन्दार-
राजितांघ्रि-युगः ।
वीरजिनः प्रक्षालयतु मम सकल-मवद्य-जम्बालम् ॥)

२९२ **अय्ये किल विय्याहले आगदे ।**
( = अद्य किल विद्याधरः आगतः । )

२९६ **हगे न एलिशाह कम्माह काली ।**
( = अहं न ईदृशस्य कर्मणः कारी (कर्त्ता) । )

२९६ **भगदत्तशोणिदाह कुम्भे ।**
( = भगदत्तशोणितस्य कुम्भः । )

२९६ **भीमशेणस्स पश्चादो हिण्डीअदि ।**
( = भीमसेनस्य पश्चात् हिण्ड्यते । )

२९६ **हिडिम्बाए घडुक्कय-शोके ण उवशमदि ।**
( = हिडिम्बायाः घटोत्कच-शोको न उपशाम्यति । )

३०१ **हगे शक्कावदालतित्त-णिवाशी धीवले ।**
( = अहं शक्रावतार तीर्थनिवासी धीवरः । )

३०१ **हग्गे संपत्ता ।**
( = वयं संप्राप्ताः । )

३०२ **पविशदु आवुत्ते शामि-पशादाय ।**

**अभिज्ञानशाकुन्तले षष्ठेऽङ्के पृ. १८१**

(= प्रविशतु भगिनीपतिः स्वामिप्रसादाय । )

३०२ **अले कि एशे महन्दे कलयले ।**

( = अरे किम् एष महान् कलकलः ! )

३०२ **मालेध वा धलेध वा अयं दाव शे आगमे ।**

**अभिज्ञानशाकुन्तले षष्ठेऽङ्के पृ. १८४**

(= मारयत वा धरत वा अयं तावत् तस्य आगमः । )

३०२ **भो कञ्चुइआ ?**

(= भो कञ्चुकिन् ? )

३०२ **एदु भवं ।**

**दृश्यताम् सूत्र-२६५**

( = एतु भवान् । )

३०२ **शमणे भयवं महावीले ।**

**दृश्यताम् सूत्र-२६५**

(= श्रमणः भगवान् महावीरः । )

३०२ **भयवं कदन्ते ये अप्पणो प≍कं उज्झिय पलस्स प≍कं प्रमाणी-कलेशि ।**

(= भगवान् कृतान्तः य आत्मनः पक्षं उज्झित्वा परस्य पक्षं प्रमाणीकरोषि ।[1]

२०३ **अय्य ! एशे खु कुमाले मलयकेदू ।**

(= आर्य ! एषः खलु कुमारः मलयकेतुः । )

---

१. अत्र 'पमाणी कलेदि' (प्रमाणी करोति) इति पाठोऽस्मन्या समीचीनः प्रतिभाति ॥

३०२ अले कुम्भिला[1] कधेहि ।

अभिज्ञानशाकुन्तले षष्ठेऽङ्के पृ० १८१

(= अरे कुम्भिर ! कथय । )

३०२ ओशलध अय्या ओशलध ।

(= अपसरत आर्याः ! अपसरत । )

३०२ किं खु शोभणे बह्मणे शित्ति कलिय लञ्आ पलिग्गहे दिण्णे ।

अभिज्ञानशाकुन्तले षष्ठेऽङ्के पृ० १८२

(= किं खलु शोभनः ब्राह्मण असि इति कृत्वा राज्ञा परिग्रहो दत्तः[2] ।

३०२ अमच्चलक्कशं पिक्खिदुं इदो य्येव आगश्चदि ।

(= अमात्यराक्षसं प्रेक्षितुम् इत एव आगच्छति । )

३०२ अले किं एशे महन्दे कलयले शुणीयदे ।

(= अरे किम् एषः महान् कलकलः श्रूयते । )

३०२ ता कहिं नु गदे लुहिलप्पिए भविस्सिदि ।

(= तस्मात् कुत्र नु गतः रुधिरप्रियो भविष्यत्ति । )

३०२ अहं पि भागुलायणादो मुद्दं पावेमि ।

(= अहमपि भागुरायणाद् मुद्रां प्राप्नोमि । )

---

१. अत्र अभिज्ञानशाकुन्तले 'कुम्भीलया' इति पाठः, तस्य च तत्र 'कुम्भीरक !' ( = चौर ! ) इत्यर्थः ।।

२ परिग्रहः=स्त्री इत्यर्थः ।।

३०२ **शुणध दाणिं हगे शक्कावयालतिस्त-णिवाशी धीवले ।**

(= शृणुत इदानीम्, अहं शक्रावतारतीर्थनिवासी[1] धीवरः)

**अभिज्ञानशाकुन्तले षष्ठेऽङ्के पृ० १८२**

३०२ **ता याव पविशामि ।**

( = तस्मात् यावत् प्रविशामि ।

३०२ **युत्तं णिमं ।**

( = युक्तम् इदम् ।)

३०२ **शालिशं णिमं ।**

( = सदृशम् इमम् )

३०२ **हीमाणहे जीवन्त-वश्चा मे जणणी ।**

**उदात्तराघवे**

( =विस्मयः-जीवद्वत्सा मे जननी । )

३०२ **हीमाणहे पलिस्सन्ता हगे एदेण णिय-विधिणो दुव्ववशिदेण ।**

**विक्रान्तभीमे ।**

(= विस्मयः-परिश्रान्ताः वयम् एतेन निजविधेः दुर्व्यवसितेन । )

३०२ **णं अवशलोपशप्पणीया लाआणो ।**

**अभिज्ञानशाकुन्तले षष्ठेऽङ्के पृ. १८५**

(= ननु अवसरोपसर्पणीया राजानः । )

---

१. अत्र अभिज्ञानशाकुन्तले 'शुणध दाणिं । हगे शक्कावदालब्भन्तरालवाशी धीवले' (= शृणुतेदानीम्, अहं शक्रावताराभ्यन्तरालवासी धीवरः ) इति पाठः ॥

३०२ अम्महे एआए शुम्मिलाए शुपलिगढिदे भवं ।
(= हर्षः–एतस्यां सुर्मिलायां सुपरिगृद्धो भवान् । )

३०२ हीही संपन्ना मे मनोलधा पियवयस्सस्स ।
( = हर्षः–संपन्ना मम मनोरथाः प्रियवयस्यस्य । )

३१० किंपि किंपि हितपके अत्थं चिन्तयमानी ।
( = किमपि किमपि हृदयके अर्थं चिन्तयमाना । )

३१६ पुधुमतंसने सव्वस्स य्येव संमानं कीरते ।
( = प्रथमदर्शने सर्वस्य एव सन्मानं क्रियते । )

३२० तं तद्धून चिन्तितं रञ्ञा का एसा हुवेय्य ।
( = तां दृष्ट्वा चिन्तितं राज्ञा का एषा भविष्यति । )

३२१ ताव च तीए दुरातो य्येव तिट्ठो ।
( = तावच्च तया दूरादेव दृष्टः । )

३२२ तत्थ च नेन कतसिनानेन ।
( = तत्र च तेन कृतस्नानेन । )

३२२ पूजितो च नाए पातग्गकुसुमप्पतानेन ।
( = पूजितश्च तया पादाग्रकुसुमप्रदानेन । )

३२२ एवं चिन्तयन्तो गतो सो नाए समीपं ।
( = एवं चिन्तयन् गतः सः तस्याः समीपम् । )

३२३ अध ससरीरो भगवं मकरधजो एत्थ परिब्भमन्तो हुवेय्य ।
( = अध सशरीरो भगवान् मकरध्वजः अत्र परिभ्रमन् भविष्यति । )

३२३ **एवंविधाए भगवतीए कधं तापसवेसगहनं कतं ।**
( = एवंविधया भगवत्या कथं तापसवेशग्रहणं कृतम् । )

३२३ **एतिसं अतिट्ठपूरवं महाधनं तद्धून ।**
( = ईदृशम् अदृष्टपूर्वं महाधनं दृष्ट्वा । )

३२३ **भगवं यति मं वरं प्रयच्छसि ।**
( = भगवन् ! यदि मम वरं प्रयच्छसि । )

३२३ **राजं च दाव लोके ।**
( = हे राजन् ! च तावत् लोके । )

३२३ **ताव च तीए तुरातो य्येव तिट्ठो सो आगच्छमानो राजा ।**
( = तावच्च तया दूराद् एव दृष्टः स आगच्छम् राजा । )

३२४ **सगर-पुत्त-वचनं ।**
( = सगरपुत्र वचनं । )

३२४ **विजयसेनेन लपितं ।**
( = वजयसेनेन लपितं । )

३२६ **पनमथ पनय पकुप्पित-गोली-चलनग्ग-लग्ग-पतिबिम्बं ।**
**तससु नख-तप्पनेसुं एकातस-तनु-थलं-लुद्दं ॥**
**बृहत्कथायाम्**[१]
( =प्रणमत-प्रणय-प्रकुपित-गौरी-चरणाग्र-लग्नप्रतिबिम्बम् ।
दशसु नखदर्पणेसु एकादश-तनुधरं रुद्रम् । )

---

१. महाकविना गुणाढ्येन पैशाचीभाषायाम् विरचिताया बृहत्कथाया मङ्गलाचरणेऽयं श्लोकः इति भोजविरचितस्य सरस्वतीकण्ठाभरण-

३२६ नच्चंतस्स य लीला-पातुक्खेवेन कम्पिता वसुथा ।
उच्छल्लन्ति समुद्दा सइला निपतन्ति तं हलं नमथ ॥
( = नृत्यतश्च लीला-पादोत्क्षेपेण कम्पिता वसुधा ।
उच्छलन्ति समुद्राः शैलाः निपतन्ति तं हरं नमत ॥ )

---

व्याकरणस्य आजडविरचितायां प्राचीनायां व्याख्यायां निर्दिष्टम् ! तथाहि "नात्युत्तम-पात्र प्रयोज्या पैशाची शुद्धा, यथा–पनमत...... ....लुद्दम् ॥" इति सरस्वती कण्ठाभरणे विद्यते । अस्य व्याख्यायाम् बृहत्कथायामादिनमस्कारोऽयम् । अत्र पैशाची भाषा इति आजडेन उक्तम् । आजडेन विरचितेयं व्याख्या अणहिलपुरपत्तने (पाटणनगरे) श्री हेमचन्द्राचार्यज्ञानमन्दिरे विद्यते ॥

चिरन्तनमुनिप्रणीता आचार्यश्रीहेमचन्द्रसूरिविरचितशब्दानुशासन-स्याष्टमाध्याये चतुर्थे पादे अपभ्रंशभाषानुशासनप्रस्तावोदाहृत-

# * दोधकवृत्तिः *

卐

सूत्र—

३३० ढोल्ला सामला, धण चम्पावण्णी ।
नाइ सुवण्णरेह, कसवट्टइ दिण्णी ॥ १ ॥[1]

'ढोल्ला' नायकः 'सामला' श्यामलः, 'धण' प्रिया 'चम्पावण्णो' चम्पकवर्णा, 'नाइ' इवार्थे, 'सुवण्णरेह' सुवर्ण-रेखा 'कसवट्टइ' कषपट्टके 'दिण्णी' दत्ता इव। विपरीत-रतावेतदुपमान संभाव्यते ॥१॥

३३० ढोल्ला मइं तुहुं वारिया, मा कुरु दीहा माणु ।
निद्दए गमिही रत्तडी, दडवड होइ विहाणु ॥ २ ॥[2]

---

१. प्राकृतव्याकरणवृत्तौ उदाहृतानां दोधकानामर्थापेक्षया शब्दापेक्षया वा क्वचिद् ग्रन्थान्तरैः कथञ्चित् साम्यं दृश्यते तदत्र तुलारुपेण उपन्य-स्यते ।

मरगय—वन्नह पियह उरि, पिय चंपय-पह-देह ।
कसवट्टइ दिन्निय सरइ, नाइ सुवण्णह रेह ॥

कुमारपालप्रतिबोधे पृ० १०८

२. दे सुयणु पसिय एण्हिं पुणो, वि सुलहाइं रूसिअव्वाइं ।
एसा मयच्छि मअलंछणुज्जला गलइ छण-राइ ॥

गाथासप्तशत्याम् ५-६६

'ढोल्ला' ! हे नायक ! 'मइं' मया 'तुहुं' त्वं 'वारिया' वारितः, 'दीहा' दीर्घं 'माणु' मानं मा कुरु, 'निद्दए' निद्रया 'गमिही' गमिष्यति 'रत्तडी' रात्रिः, 'दडवड' शीघ्रं 'होइ' भवति 'विहाणु' प्रभातम् ।। २ ।।

३३० बिट्टीए मइ भणिय तुहुं, मा करु वङ्की दिट्ठि ।
पुत्ति सकण्णी भल्लि जिवँ, मारइ हिअइ पइट्ठि ।। ३ ।।[1]

'बिट्टीए' ! हे पुत्रिके ! 'मइ' मया 'तुहुं' त्वं 'भणिय' भणिता, मा कुरु 'वङ्की' वक्रां 'दिट्ठी' दृष्टिम् । 'पुत्ति' ! हे पुत्रिके ! 'सकण्णी' सकर्णा 'भल्लि' 'जिवँ' इव इयम् । (तव दृष्टिः) 'मारइ' मारयति 'हिअइ' हृदये 'पइट्ठि' प्रविष्टा ।। ३ ।।

३३० एइ ति घोडा एह थलि, एइ ति निसिआ खग्ग ।
एत्थु मुणिसिम जाणीअइ, जो नवि वालइ वग्ग ।। ४ ।।

'एइ' एते 'ति' ते 'घोडा' घोटकाः, 'एह' एषा सा 'थलि' स्थली 'एइ' एते 'ति' ते 'निसिआ' निशिताः 'खग्ग' खड्गाः, 'एत्थु' अत्र 'मुणिसिम' मनुष्यत्वं 'जाणीअइ' ज्ञायते, 'जो' यः 'नवि' नैव 'वालइ' वालयति 'वग्गं' वल्गाम्[2] ।।४।।

३३१ दहमुहु भुवण-भयंकरु,
तोसिअ-संकरु णिग्गउ रह-वरि चडिअउ ।

---

३. कस्स न भिदइ हिययं अणंग-सर-धोरणि व्व निवडंती ।
वालाए वलिय-लोयण-फुरंत-मयणालसा दिट्ठि ।।

१. अस्मिन् मनुष्यत्वं पौरुषत्वं वर्तते, यः पूर्वं सैन्यं दृष्ट्वा स्वस्याश्वस्य वल्गां न वालयति, न पश्चान्निवर्तत इत्यर्थः ।।

**चउमुहु छंमुहु** झाइवि एक्कहिं
लाइवि णावइ दइवें **घडिअउ** ॥५॥

'दहमुहु' दशमुखः 'भुवण-भयंकरु' भुवनभयंकरः 'तोसिअसंकरु' तोषितशंकरः-पूजितशंकरः 'णिग्गउ' निर्गतः 'रह-वरि' रथवरे 'चडिअउ' चटितः। 'णावइ' इवार्थः, उत्प्रेक्ष्यते इत्यर्थः। 'चउमुहु' चतुर्मुखं ब्रह्माण 'छंमुहु' षण्मुखं कार्तिकेयं 'झाइवि' ध्यात्वा 'एक्कहिं' एकस्मिन् रावणे 'लाइवि' लगित्वा, कोऽर्थः एतद्द्वयमपि एकीकृत्य रावणो 'घडिअउ' घटितः निर्मितः 'दइवे' दैवेन, दशमुखत्वादित्यर्थः ॥ ५ ॥

३३२ अगलिय-नेह-निवट्टाहं, जोअण-लक्खुवि जाउ ।
वरिससएणवि जो मिलइ, सहि सोक्खहं सो ठाउ ॥६॥

'अगलियनेह' अगलितस्नेहाः 'निवट्टाहं' निवृत्ता वलिताः तेषाम् 'जोअण-लक्खुवि' योजनलक्षमपि 'जाउ' यात्वा 'वरिससएणवि' वर्षशतेनापि 'जो' यो 'मिलइ' मिलति 'सहि' हे सखि ! सौख्यानां स पृष्ठगन्ता स्थानं तेषां प्राग्वर्तितानामित्यर्थः ॥ ६ ॥

३३२ अंगहिं अंगु न मिलिउ हलि, अहरें अहरु न पत्तु ।
पिअ जोअंतिहे मुह-कमलु, एम्वइ सुरउ समत्तु ॥ ७ ॥

'अंगहिं' अङ्गैरङ्गं न मिलितम्, हे सखि ! अधरेण, अधरो न प्राप्तः, प्रियस्य मुखकमलं पश्यन्त्या एवं सुरतं समाप्तम् । अतिरसातिरेकात्संभोगात्पूर्वमेव द्राव इति भावः ॥ ७ ॥

३३३ जे महु दिण्णा दिअहडा, दइएं पवसंतेण ।
ताण गणंतिए अंगुलिउ, जज्जरिआउ नहेण ॥८॥[1]

'जें महुत्ति' ये मम दत्ता दिवसा दयितेन प्रवसता चलता सता, तान् दिवसान् गणयन्त्या ममाङ्गुल्यो जर्जरिता नखेन । दयितोक्तदिनानां वारंवारमङ्गुलोपर्वभिर्गुणनादित्यर्थः ॥ ८ ॥

३३४ सायरु उप्परि तणु धरइ, तलि घल्लइ रयणाइं ।
सामि सुभिच्चुवि परिहरइ, सम्माणेइ खलाइं ॥ ९ ॥

'सायरु' सागरः तृणानि उपरि धरति, तले क्षिपति रत्नानि । स्वामी सुभृत्यमपि परिहरति, सान्मानयति खलान् दुर्जनान् ॥ ९ ॥

३३५ गुर्णाहिं न संपइ कित्ति पर, फल लिहिआ भुंजन्ति ।
केसरि न लहइ बोड्डिअवि, गय लक्खेहिं घेप्पन्ति ॥ १० ॥[2]

'गुणहिं गणैर्न संपदः, परं कीर्त्तिर्भवतु । जीवाः फलानि लिखितानि, ललाटपट्टिकायामिति गम्यते, भुञ्जन्ति । दृष्टान्तयति–केसरी कपर्द्दिकामपि न लभते, गजास्तु लक्षैर्गृह्यन्ते ॥ १० ॥

३३६ वच्छहे गृण्हइ फलइं जणु, कडु-पल्लव वज्जेइ ।
तोवि महद्दुमु सुअणु जिवँ, ते उच्छंगि धरेइं ॥ ११ ॥

---

१. हत्थेसु अ पाएसु अ अंगुलिगणणाइ अइगआ दिअहा ।
एण्हि उण केण गणिज्जउ त्ति भणिउ रुअइ मुद्धा ॥

**गाथासप्तशत्याम् ४-७**

१. एक्कइ वन्न वसंतडा, एव्वड अंतर काइ ।
सिंघ कवड्डी ना लहइ, गयवर लक्ख विकाइ ॥

**राजस्थानी दोहा**

'वच्छहे' जनो वृक्षात् फलानि गृह्णाति, कटुपल्लवानि वर्जयति, तथापि महाद्रुमस्तान् पल्लवान् उत्सङ्गे धरति, क इव ? यथा सुजनः कटुपल्लवप्रायानपि जनान् धरति न तु तिरस्करोतीत्यर्थः ॥ ११ ॥

३३७ दूरुड्डाणें पडिउ खलु, अप्पणु जणु मारेइ ।
जिह गिरि-सिङ्गहु पडिआ सिल, अन्नुवि चूरु करेइ ॥१२॥

दूरोड्डीनेन दूरगमनेन पतितः खलो दुर्ज्जन आत्मानं जनं च मारयति । दृष्टान्तमाह-यथा गिरिशृङ्गेभ्यः पतिता शिला आत्मानमन्यमपि पतनस्थानस्थं चूर्णीकरोतीत्यर्थः ॥१२॥

३३८ जो गुण गोवइ अप्पणा, पयडा करइ परस्सु ।
तसु हउं कलि-जुगि दुल्लहहो, बलि किज्जउं सुअणस्सु ॥१३॥

य आत्मीयगुणान् गोपयति, परस्य गुणान् प्रकटान् करोति, अहं तस्य कलियुगे दुर्लभस्य स्वजनस्य सज्जनस्य वा बलि-पूजां क्रिये ? (करोमि) इति भावः ॥ १३ ॥

३३९ तणहं तइज्जी भंगि नवि, तें अवड-यडि वसन्ति ।
अह जणु लग्गिवि उत्तरइ, अह सह सइं मज्जंति ॥१४॥

'तणहं' तृणानां तृतीया-भङ्गी नापि नैव तृतीयः प्रकारोऽस्ति, तेन कारणेन अवटतटे कूपतटे वसन्ति । अथ यो जनस्तृणानि लगित्वा उत्तरति, अथ इति अथवा तृणानि जनेन सह स्वयं मज्जन्ति । अन्योऽपि यः प्रकारद्वयं कर्तुकामो भवति स विषमस्थाने वसति । प्रकारद्वयं किं ? म्रियते शत्रून् वा जयति इति भावार्थः ॥ १४ ॥

३४० दइवु घडावइ वणि तरुहुं, सउणिहं पक्कफलाइं ।
सो वरि सुक्खु पइठ्ठु णवि, कण्णहिं खल-वयणाइं ।।१५।।[१]

'दइवु' दैवं वने तरूणां पक्वफलानि शकुनीनां पक्षीणां कृते घटयति, तत् सौख्यं वरम्, कर्णयो: प्रविष्टानि खल-वचनानि सुखं नैवेत्यर्थ: ।। १५ ।।

३४० धवलु विसूरइ सामिअहो, गरुआ भरु पिक्खेवि ।
हउं किं न जुत्तउ दुहुं दिसिहिं, खण्डइं दोण्णि करेवि ।।१६।।[२]

धवलो वृषभ: धौरेयो विषीदति विषादं करोति । किं कृत्वा ? स्वामिनो गुरुभारं प्रेक्ष्य । किं मनस्यचिन्तयत् ? इत्याह-अहं किं न योजित: ?, क्व ? द्वयोर्दिशो:, किं कृत्वा ? द्वौ खण्डौ कृत्वेत्यर्थ: ।। १६ ।।

३४१ गिरिहे सिलायलु तरुहे फलु, घेप्पइ नीसावन्नु ।
घरु मेल्लेप्पिणु माणुसहं, तो वि न रुच्चइ रन्नु ।।१७।।[३]

नि:सामान्यं सर्वोऽपि जनो गृहं मुक्त्वा गिरे: शिलातलं गृह्णाति, तरो: फलं गृह्णाति, ततोऽपि मनुष्याणामरण्यं नो रोचते इत्यर्थ: ।। १७ ।।

---

१. वरि खज्जइ गिरि-कंदरि कसेरु ।
णउ दुज्जणभउंहावंकियाइं, दीसंतु कलुस-भावंकियाइं ।।
महापुराणे १।३।१२-१३

२. दोधकोऽयम् उपाध्याय श्री विनयविजयविरचितायां कल्पसूत्रटीकायां सुबोधिकायाममपि षष्ठे व्याख्याने शूलपाणियक्षपूर्वजन्मकथायाम् उद्धृत: ।।

३. वत्थाइं वक्कलाइं वित्थिन्न-सिलायलाइं सयणीयं ।
असणं जत्थ फलाइं तं रन्नं कह न रमणीयं ।।
ज्ञानपञ्चमी कथायाम् ६।५१

३४१ तरुहुं वि वक्कलु फलु मुणि वि, परिहणु असणु लहन्ति ।
सामिहुं एत्तिउ अग्गलउं, आयरु भिच्च गृह्णन्ति ॥१८॥

मुनयोऽपि तरुभ्यो वल्कलं परिधानं फलमशनं च क्रमेण लभन्ते, परं स्वामिभ्य इयदर्गलं इयदधिकं यद्भृत्या आदरं गृह्णन्तीत्यर्थः ॥ १८ ॥

३४१ अह विरल–पहाउ जि कलिहि धम्मु ॥
अथ विरलप्रभावः तुच्छप्रभावः जि–एवार्थे कलियुगे धर्मः ॥

३४२ दइएं पवसन्तेण० ( दो० ८ )
'दइएंति' पूर्ववत् ।

३४३ अग्गिएं उण्हउ होइ जगु वाएं सीअलु तेवँ ।
जो पुणु अग्गि सीअला तसु उण्हत्तणु केवँ ॥१९॥

अग्निना जगदुष्णं भवति, तथा वातेन शीतलं भवति । यः पुनरग्निना शीतलस्तस्योष्णत्वं कथम् ? न कथमपीत्यर्थः॥१९॥

३४३ विप्पिअ–आरउ जइवि पिउ, तोवि तं आणहि अज्जु ।
अग्गिण दड्ढा जइवि घरु, तो तें अग्गि कज्जु ॥२०॥[1]

हे आर्ये ! हे सखि ! विप्रियकारकोऽप्रियकारको यद्यपि प्रियः, तथापि तमानय, अग्निना दग्धं यद्यपि गृहं, ततोऽपि तेनाग्निना सह कार्यं भवेत् ॥ २० ॥

३४४ एइ ति घोडा एह थलि० ।
'एइ ति घोडा' इति पूर्ववत् (दो० ४) ।

---

१. जेण विणा ण जिविज्जइ अणुणिज्जइ सो कयावराहोवि ।
पत्ते वि णयरदाहे भण कस्स ण वल्लहो अग्गी ॥
गाथासप्तशत्याम् २।६३

३४४ जिवँ जिवँ वंकिम लोअणहं, णिरु सामलि सिक्खेइ ।
तिवँ तिवँ वम्महु निअय-सर, खर-पत्थरि तिक्खेइ ॥२१॥

यथा यथा श्यामला स्त्री लोचनानां निश्चितं वक्रत्वं शिक्षते, तथा तथा मन्मथो निजशरान् खरप्रस्तरे कठोर-पाषाणे तीक्ष्णान् करोतीत्यर्थः ॥२१॥

३४५ संगर-सएहिं जु वण्णिअइ, देक्खु अम्हारा कन्तु ।
अइमत्तहं चत्तङ्कुसहं, गय कुम्भइं दारन्तु ॥२२॥

हे सखीति गम्यते, तं मदीयं कान्तं पश्य, यः सङ्ग्राम-शतेषु वर्ण्यते, अतिमत्तानां त्यक्ताकुङ्शानां गजानां कुम्भान् दारयन्तमित्यर्थः ॥ २२ ॥

३४६ तरुणहो तरुणिहो मुणिउ मइं करहु म अप्पहो घाउ ॥

तरुणहो हे तरुणाः, 'तरुणिहो' हे तरुण्यः ! ज्ञात्वा मां आत्मनो घातं मा कुरुत ॥

३४७ गुणहिं न संपइ कित्ति पर० ।

'गुणहिं इति' पूर्ववत् (दो० १० ) ॥

३४७ भाईरहि जिवँ भारइ मग्गेहिं तिहिंवि पयट्टइ ।

'भाईरहि' भागीरथी 'जिवँ' यथा 'भारइ' भरतस्येयमिति भारती, 'तिहिंवि' त्रिष्वेव मार्गेषु प्रवर्तते ॥

३४८ अंगुलिउ जज्जरिआउ नहेण० ।

'अंगुलिउ जज्ज०' इति पूर्ववत् ( दो० ८ ) ।

३४८ सुन्दर-सव्वङ्गाउ विलासिणीओ पेच्छन्ताण ।

सुन्दरं सर्वं अङ्गं यासां ताः सुन्दरसर्वाङ्गा विलासिन्यः स्त्रियः [ताः] पश्यतां पुरुषाणाम् ।

३४९ निअ-मुहु-करहिंवि मुद्ध कर, अन्धारइ पडिपेक्खइ ।
ससि-मंडल-चंदिमए पुणु, काइं न दूरे देक्खइ ॥२३॥

काचिन्मुग्धा स्त्री निजमुखकरैः-निजमुखकिरणैरन्धकारे 'कर' हस्तं प्रतिप्रेक्षते-पश्यति । शशिमण्डलचन्द्रिकया पूर्णशशाङ्कमण्डलकान्त्या दूरे दूरस्थे पदार्थे पुनः किं न पश्यति, अपि तु पश्यत्येव ॥ २३ ॥

३४९ जहिं मरगय-कन्तिए संवलिअं ॥

'जहिं' यथा 'मरगयकन्तिए' मरकतरत्नकान्त्या 'संवलियं मिश्रितम् ॥

३५० तुच्छ-मज्झहे तुच्छ जम्पिरहे ।

तुच्छच्छ-रोमावलिहे तुच्छ-राय तुच्छयर-हासहे
पिय-वयणु अलहन्तिअहे
तुच्छकाय-वम्मह-निवासहे ॥ २४ ॥

अन्नु जु तुच्छउं तहे धणहे, तं अक्खणह न जाइ ।
कटरि थणंतरु मुद्धडहे, जें मणु विच्चि ण माइ ॥२५॥ (युग्मम्)

'तुच्छरागेति' नायकस्य दूतीकृतामन्त्रणं, हे तुच्छराग ! स्वल्पो रागः स्नेहो यस्य नायकस्य स तथा, तस्या नायिकायाः अन्यद्यत्तुच्छं तदाख्यातुं न याति, नायिकायाः किंभूतायाः ? तुच्छमध्यायाः, पुनः किं भूतायाः ? तुच्छजल्पन शीलायाः, पुनः किं भूतायाः ? तुच्छाच्छरोमावल्याः, पुनः किं भूतायाः ? तुच्छतरहासायाः, पुनः किं भूतायाः ? प्रियवचनमलभमानायाः, पुनः किं भूतायाः ? तुच्छकायमन्मथनिवासायाः तुच्छकाये मन्मथनिवासो यस्याः सा, तुच्छकायत्वं भर्तृविरहात्, 'कटरि'-इत्याश्चर्ये येन कारणेन 'मुद्धडहे' मुग्धायाः स्तनान्तरं मनोवर्त्मनि न माति, स्तनयोरतिपीनत्वात्, अन्तरस्यातितुच्छत्वं वर्णितमित्यर्थः ॥२४॥ ॥ २५ ॥ युग्मम् ॥

३५० फोडेन्ति जे हियडउं अप्पणउं, ताहं पराई कवण घण ।
रक्खेज्जहु लोअहो अप्पणा, बालहे जाया विसम थण ॥२६॥[1]

यौ स्तनौ आत्मीयं हृदयं स्फोटयतः, तयोः परकीया घृणा-दया का स्यात् । हे लोकाः ! आत्मानं रक्षत, यतः कारणात् बालायाः विषमौ स्तनौ जातौस्त इत्यर्थः ॥ २६ ॥

३५१ भल्ला हुआ जु मारिआ, बहिणि महारा कन्तु ।
लज्जेज्जं तु वयंसिअहु, जइ भग्गा घरु एन्तु ॥ २७ ॥

हे भगिनि ! इदं भव्यं भूतं, यन्मदीयः कान्तो मारितः । यदि भग्नो गृहमैष्यत् तर्हि वयस्याभ्यो वयस्यानां वा-सखीभ्यः सखीनां मध्ये मा लज्जां प्राप्स्यमित्यर्थः ॥ २७ ॥

३५२ वायसु उड्डावन्तिअए, पिउ दिट्ठउ सहसत्ति ।
अद्धावलया महिहि गय, अद्धा फुट्ट तडत्ति ॥ २८ ॥[2]

वायसं-काकमुड्डाययन्त्या कयाचित् स्त्रिया सहसत्ति प्रियो दृष्टः, इति हेतोः 'अद्धा' इति अर्द्धं वलयानामस्यां पृथिव्यां गतं, अर्द्धं स्फुट्टं, कथं तडत् इति यथा स्यात् । एतावता अर्द्धं त्रुटित्वा भूमौ पतितं, अर्द्धानि वलयानि त्रटदिति कृत्वा स्फुटितानि इत्यर्थः ॥ २८ ॥

---

१. स्वकीयं उदरं भित्त्वा निर्गतौ च पयोधरौ ।
परकीय-शरीरस्य भेदने का कृपालुता ॥
सुभाषितरत्नभाण्डागारे पृ. २५६ श्लोक २६४

२. काग उडावण धण खड़ी, आया पीव भडक्क ।
आधी चुडी काग गल, आधी गइ तडक्क ॥
राजस्थानी दोहा

३५३ कमलइं मेल्लवि अलि-उलइं करि-गण्डाइं महन्ति ।
असुलहमेच्छण जाहं भलि, ते णवि दूर गणन्ति ।। २९ ।।

अलिकुलानि कमलानि मुक्त्वा करिगण्डानि काङ्क्षन्ति। येषामसुलभं–दुर्लभमिषितुं 'भलि' कदाग्रहो भवति ते दूरे नापि गणयन्तीत्यर्थः ।। २९ ।।

३५४ अन्नु जु तुच्छउं तहे धणहे० (दो० २५ ) ।

'तहे' तस्याः 'धणहे' स्त्रिय अन्यत् 'जु' यत् 'तुच्छउं' तुच्छकं अस्ति ।।

३५४ भग्गउं देक्खिवि निअय बलु, बलु पसरिअउं परस्सु ।
उम्मिल्लइ ससि-रेह जिवँ, करि करवालु पियस्सु ।। ३० ।।

'भग्गउं' हे सखीति गम्यते, यथा द्वितीयादितिथौ शशिरेखा चन्द्ररेखा प्रकटी भवति, तथा प्रियस्य करे हस्ते करवालः खड्ग 'उम्मिल्लइ' शोभते । किं कृत्वा ? दृष्ट्वा निजबलं निजसैन्यं भग्नकं, पुनः परस्य शत्रोः 'बलु' सैन्यं प्रसृतकं विस्तृतकमित्यर्थः ।

३५५ जहां होन्तउ आगदो । तहां होन्तउ आगदो ।
कहां होन्तउ आगदो ।

'जहां' यस्मात् 'होन्तउ' भवन् 'आगदो' आगतः । 'तहां' तस्मात् भवन् आगतः । 'कहां' कस्मात् भवन् आगतः ।

३५६ जइ तहो तुट्टउ नेहडा, मइं सहुं नवि तिल-तार ।
तं किहे वङ्केहि लोअणेहिं, जोइज्जउं सय-वार ।। ३१ ।।

हे तिलतार ! तिलवत्स्निग्धा तारा–कनिनिका यस्य स, तस्य सम्बोधनम्, यदि तव स्नेहो मया सह नापि त्रुटितः, तत् तस्मादहं त्वया वक्राभ्यां लोचनाभ्यां शतवारं विलोक्यत इत्यर्थः ।।३१।।

३५७ जहिं कप्पिज्जइ सरिण सरु, छिज्जइ खग्गिण खग्गु ।
तहिं तेहइ भड-घड-निवहि, कन्तु पयासइ मग्गु ।।३१।।

यस्मिन् 'कप्पिज्जइ' कर्त्यते शरेण-बाणेन शरो-बाणः, यस्मिन् खड्गेन खड्गः छिद्यते, 'तहिं' तस्मिन् सङ्ग्रामे 'तेहइ'-तादृशे स्थाने 'भडघडनिवहि' भटानां सुभटानां या घटास्तासां निवहे, अथवा भटलक्षणे घडनिवहि वृक्षमूलसमूहे (?) कान्तो मार्गं प्रकाशयतीत्यर्थः ।। ३२ ।।

३५७ एक्कहिं अक्खिहिं सावणु, अन्नहिं भद्दवउ ।
माहउ महिअल-सत्थरि, गण्ड-त्यले सरउ ।।३३।।
अङ्गिहिं गिम्ह सुहच्छी-तिलवणि मग्गसिरु ।
तहे मुद्धहे मुह-पङ्कइ, आवासिउ सिसिरु ।।३४।।[1] (युग्मम्)।।

तस्या मुग्धाया एकस्मिन्नक्षिणि श्रावणः, अन्यस्मिन्नक्षिणि भाद्रपदः, को भावः ? यथा एतौ द्वौ मासौ स्राविणौ तथाऽक्षिद्वयमपि अश्रुजलस्राविस्वात् मासद्वयतुल्यम् । महीतलस्रस्तरे भूतलसंस्तारके माधवो वसन्तः पल्लवमयत्वात् । गण्डस्थले शरत्, तस्याः काशकुसुमादिना पाण्डुत्वात् । अङ्गेषु ग्रीष्मः, तापबाहुल्यात्, सुखासिका तिलवने सुखासिका सुखावस्थानं सा एव तिलवनं तस्मिन् मार्गशीर्षः, मार्गशीर्षे तिलवनानामुच्छेदः स्यात् तथा सुखावस्थानस्योच्छेदः । मुखपङ्कजे शिशिर आवासितः, यथा शिशिरे पङ्कजानां म्लानत्वं यथा मुखपङ्कजस्यापि । स्त्रीणां हि वियोगावस्थायामेतानि चिह्नानि स्युः तेनेत्युक्तम् ।। ३३ ।। ३४ ।। युग्मम् ।।

३५७ हिअडा फुट्टि तडत्ति करि, कालक्खेवें काइं ।
देक्खउं हय-विहि कहिं, ठवइ पइं विणु दुक्ख-सयाइं ।।३५।।

१. सरस्वतीकण्ठाभिरणे अयं दोधकः वर्तते, २।७६।।

'हिअडा' हे हृदय ! ऋटदिति कृत्वा स्फुट, कालक्षेपेन–कालविलम्बेन किम् पश्यामि, हतविधिः 'पइं विणु' मया विना दुःखशतानि कुत्र स्थापयतीत्यर्थः ।।३५।।

३५८ कन्तु महारउ हलि सहिए, निच्छइं रूसइ जासु ।
अत्थिहिं सत्थिहिं हत्थिहिं वि, ठाउवि फेडइ तासु ।। ३६ ।।

हे हले हे सखि ! मदीयः कान्तो निश्चयेन यस्य रुष्यति तस्य स्थानकं स्फेटयति, कैः ? अर्थैः–द्रव्यैः शस्त्रैः, हस्तैरपि ।। ३६ ।।

३५८ जीविउ कासु न वल्लहउं धणु पुणु कासु न इट्ठु ।
दोण्णिवि अवसर-निवडिअइ तिण-सम गणइ विसिट्ठु ।।३७।।

'जीविउ' जीवितं कस्य वल्लभं न स्यात्, धनं पुनः कस्येष्टं न स्यात्, विशिष्टो मनुजोऽवसरे पतिते द्वेऽपि जीवितधने तृणसमे गणयति ।।३७।।

३५९ जहे केरउ, तहे केरउ, कहे केरउ ।

'जहे' यस्याः 'केरउ' सम्बन्धी । 'तहे' तस्याः 'केरउ' सम्बन्धी । 'कहे' कस्याः 'केरउ' सम्बन्धी ।।

३६० प्रङ्गणि चिट्ठदि नाहु ध्रुं त्रं रणि करदि न भ्रन्त्रि ।।

'प्रङ्गणि' प्राङ्गणे गृहाङ्गणे 'ध्रु' यः 'नाहु' नाथः तिष्ठति, 'त्रं' सः 'रणि' रणे, संग्रामे 'करदि' करोति युद्धादि, 'नभ्रन्त्रि' भ्रान्तिर्नास्ति ।

तं बोल्लिअइ जु निव्वहइ ।

'तं' तद् 'बोल्लिअइ' कथ्यते, 'जु' यत् 'निव्वहइ' निर्वाह्यते ।।

३६१ इमु कुलु तुह तणउं ।
इमु कुलु देक्खु ।

'इमु' इदं कुलं 'तुह' तव 'तणउं' सम्बन्धि ।
'इमु' इदं कुलं पश्य ॥

३६२ एह कुमारी एहो नरु, एहु मणोरह-ठाणु ।
एहउं वढ चिन्तन्ताहं, पच्छइ होइ विहाणु ॥ ३८ ॥

'एह' एषा कुमारी, 'एहो' एषः, अहं नरः, एतन्मनोरथस्थानम्, 'एहउं' ( एतद् ) ईदृशं चिन्तयतां 'वढ' मूर्खाणां पश्चाद्विभातं—प्रभातं भवति ॥ ३८ ॥

३६३ एइ ति घोडा एह थलि ॥ एइ पेच्छ ॥

'एइत्ति' (दोहा) पूर्ववत् ॥ एइ-एतान् पश्येत्यर्थः ॥

३६४ जइ पुच्छह घर वड्डाइं, तो वड्डा घर ओइ ।
विहलिअ-जण-अब्भुद्धरणु, कन्तु कुडीरइ जोइ ॥३९॥[1]

काचित् स्त्री पथिकं प्रत्याह,-यदि बृहन्ति गृहाणि पृच्छत, ततो बृहन्ति 'ओइ' अमूनि—प्रत्यक्षोपलभ्यमानानि गृहाणि वर्त्तन्ते। अथवा दानाद्यभिलाषीति शेषः, तदा कुटीरके विहलितजनाभ्युद्धरणं[2] कान्तं पश्येत्यर्थः ॥३९॥

३६५ आयइं लोअहो लोअणइं, जाई सरइं न भन्ति ।
अप्पिए दिट्ठइ मउलिअहिं, पिए दिट्ठइ विहसन्ति ॥४०॥[3]

लोकस्येमानि लोचनानि जातिं स्मरन्ति न भ्रान्तिः न सन्देहः । अप्रिये दृष्टे सति 'मउलिअहिं' मुकुलितन्ति-मुकुलितानीवाचरन्तीत्यर्थः । प्रिये दृष्टे सति विकसन्ति ॥४०॥

---

१. विहलुद्धरण-सहावा हुवंति जइ के वि सप्पुरिसा ।
गाथासप्तशत्याम् ३-८५

२. विह्वलिताश्च ते जनाश्च विह्वलितजनास्तान् अभ्युद्धरतीति विह्वलितजनाभ्युद्धरणस्तम् ॥

३. अइपसण्णु मुहु होइ, संभासणु पडिवज्जइ ।
पुव्व-भवंतर-नेहु, जण-दिट्ठिए जाणिज्जइ ॥
महापुराणे ६।५।१३-१४

३६५ सोसउ म सोसउ च्चिअ, उअही वडवानलस्स किं तेण ।
जं जलइ जले जलणो, आएण वि किं न पज्जत्तं ।।४१।।

'च्चिअ' निश्चयेन उदधिः शुष्यतु मा शुष्यतु वा, तेन-समुद्रशोषणेन समुद्राशोषणेन वा वडवानलस्य किं ? यदिति-क्रियाविशेषणम्, यत् जले ज्वलनो ज्वलति, अनेन जलज्वलनेन तस्य वडवानलस्य किं न पर्याप्तम् ? किं न मृतम्, अपि तु सर्वमेवेत्यर्थः ।। ४१ ।।

३६५ आयहो दड्ढ-कलेवरहो, जं वाहिउ तं सारु ।
जइ उट्ठब्भइ तो कुहइ, अह डज्झइ तो छारु ।।४२।।[1]

'आयहो' अस्य दग्धकलेवरस्य यद्वाहितं तदेव सारम् । मरणानन्तरं स्थिति शेषः, यदि आच्छाद्यते स्थाप्यते तदा कुथ्यति, अथ दह्यते तदा क्षारो-भस्म स्यात् ।।४२।।

३६६ साहु वि लोउ तडप्फडइ, वड्डत्तणहो तणेण ।
वड्डप्पणु पर पाविअइ, हत्थें मोक्कलडेण ।। ४३ ।।[2]

'साहुवि' सर्वोऽपि लोकः 'तडप्फडइ' उत्सुकी भवति आकुलीभवति । किमर्थं ? बृहत्त्वस्यार्थम् । परं 'वड्डप्पणु' बृहत्त्वं हस्तेन मुत्कलेन प्राप्यते इत्यर्थः । को भावः ? जनैर्महत्वं तदा प्राप्यते चेद्दानादिगुणाः स्युरित्यर्थः ।।४३।।

---

१. बलि किउ माणुसजम्मडा देक्खंतहं पर सारु ।
जइ उट्ठब्भइ तो कुहइ अह डज्झइ तो छारु ।।

परमात्मप्रकाशे २-१४७

२. सयलु वि को वि तडप्फडइ सिद्धत्तणहु तणेण ।
सिद्धत्तणु परिपाविअइ चित्तहं णिम्मलएण ।।

दोहापाहुडे दोहा ८८

३६७ जइ म सु आवइ दूइ घरु, काइं अहो-मुहु तुज्झु ।
वयणु जु खण्डइ तउ सहिए, सो पिउ होइ न मज्झु ॥४४॥[1]

हे दूति ! स यदि गहं न 'आवइ' आगच्छति, तर्हि तवाधोमुखं किम् ? । हे सखि ! यस्तव वचन खण्डयति स मम प्रियो न भवति इत्यर्थः ॥ ४४ ॥

३६७ काइं न दूरे देक्खइ ॥
'काइं' किं न दूरे पश्यति ॥

३६७ फोड्न्ति जे हिअडउं अप्पडउं, ताहं पराई कवण घण ।
रक्खेज्जहु लोअहो अप्पणा, बालहे जाया विसम थण ॥४५॥
व्याख्या ( दो० ) पूर्ववत् ।

३६७ सुपुरिस कंगुहे अणुहरहिं, भण कज्जें कवणेण ।
जिवँ जिवँ वड्डुतणु लहहिं, तिवँ तिवँ नवहिं सिरेण ॥४६॥

सुपुरुषाः कंगोः—धान्यविशेषस्य अनुहरन्ते—सदृशा भवन्ति, भण कथय केन कार्येण ? । उच्यते, यथा यथा बृहत्त्वं लभन्ते, तथा तथा शिरसा नमन्तीत्यर्थः ॥ ४६ ॥

३६७ जइ ससणेही तो मुइअ, अह जीवइ निन्नेह ।
बिहिंवि पयारेहिं गइअ धण, किं गज्जहि खल मेह ॥४७॥[2]

कस्याश्चिद् भर्त्ता देशान्तरं गतोऽस्ति स मेघं प्रत्याह,— सा स्त्री यदि सस्नेहा भविष्यति तदा मृता भविष्यति, मम

१. जइ सो न एइ गेहं, ता दूइ अहोमुही तुमं कीस ।
सो होही मज्झ पिओ, जो तुज्झ न खंडए वयणं ॥

वज्जालग्गे ४१७

२. किं गतेन यदि सा न जीवति, प्राणिति प्रियतमा तथापि किम् ।
इति वीक्ष्य नव मेघमालिकां, न प्रयाति पथिकः स्वमन्दिरम् ॥

भर्तृहरि विरचिते शृङ्गारशतके ६७

विरहात् । अथ जीवति तर्हि निःस्नेहा । द्वाभ्यां सस्नेह-निःस्नेहलक्षणप्रकाराभ्यां प्रिया गतिका मता, तर्हि हे खलमेघ ! दुर्जन मेघ ! त्वं किं गर्जसि इत्यर्थः ।। ४७ ।।

३६८ भमरु म रुणझुणि रण्णडइ, सा दिसि जोइ म रोइ ।
सा मालइ देसन्तरिअ, जसु तुहुं मरहि विओइ ।। ४८ ।।[1]

हे भ्रमर ! त्वमरण्ये म रुणझुणि-शब्दं मा कुरु, तां दिशं विलोक्य मा रुदिहि, पुनः सा मालती देशान्तरिता, यस्या वियोगे त्वं म्रियसे इत्यर्थः ।। ४८ ।।

३६९ तुम्हे तुम्हइं जाणह ।। तुम्हे तुम्हइं पेच्छइ ।
'तुम्हे' यूयं जानीत । युष्मान् पश्यतु ।

३७० पइं मुक्काहं विवरतरु, फिट्टइ पत्तत्तणं न पत्ताणं ।
तुह पुणु छाया जइ होज्ज, कहवि ता तेहिं पत्तेहिं ।।४९।।

'पइं' त्वया 'मुक्काहं' मुक्तानां 'विवरतरु' वयो विहंगमास्तैर्वरः विवरः एवं विधो वृक्षः तस्य सम्बोधने हे विवरतरो, अथवा हे वरतरो ? त्वया मुक्तानामपि पत्राणां पत्रत्वं न 'फिट्टइ' न याति; पुनर्यदि कथमपि तव छाया-शोभा होज्ज-अभविष्यत् 'ता' तावत् 'तेहिं पत्तेहिंति' तैः पत्रैरेव नान्यथेत्यर्थः ।। ४९ ।।

३७० महु हिअउं तइं ताए तुहुं, स वि अन्नें विनडिज्जइ ।
पिअ काइं करउं हउं, काइ तुहुं मच्छें मच्छु गिलिज्जइ ।।५०।।[2]

काचिन्नायिकाऽन्यासक्तं पतिं वक्ति—हे प्रिये ! मम

---

१. मालइ-विरहे रे तरुण-भसल मा रुवसु निब्भरुक्कण्ठं ।
वज्जालग्गे २४१

२. सा तुज्झ वल्लहा, तं सि मज्झ, वेसो सि तीअ, तुज्झ अहं ।
गाथासप्तशत्याम् २।२६

हृदयं त्वया गृहीतमिति शेषः । त्वया त्वं गृहीतः । साऽप्यन्येनापि नटयते । हे प्रिय ! अहं किं करोमि ? त्वं किं करोषि, ? मत्स्येन मत्स्यो गिल्यते इत्यर्थः ।। ५० ।।

३७० पइं मइं बेहिंवि रण-गयहिं, को जयसिरि तक्केइ ।
केसहिं लेप्पिणु जम-घरिणि, भण सुहु को थक्केइ ।।५१।।

त्वयि मयि च द्वयोरपि रणगतयोः को जयश्रियं तर्कयति अभिलषति । को यमगृहिणीं केशैः 'लेप्पिणु' गृहीत्वा सुखं यथा स्यात्तथा 'थक्केइ' तिष्ठति त्वं भण-कथय न कोऽपीत्यर्थः ।। ५१ ।।

३७० पइं मेल्लन्तिहे महु मरणु, मइं मेल्लन्तहो तुज्झु ।
सारस जसु जो वेग्गला, सोवि कृदन्तहो सज्झु ।। ५२ ।।

स्त्री काचित् कथयति सारसान्योक्त्या स्वभर्तारं । हे सारस ! त्वां मुञ्चन्त्या मम मरणम्, मां मुञ्चतस्तव मरणम् । यस्य यो दूरे स कृतान्तस्य यमस्य साध्यो भवति, मरणं प्राप्नोतीत्यर्थः ।। ५२ ।।

३७१ तुम्हेहिं अम्हेहिं जं किअउं, दिट्ठउं बहुअजणेण ।
त तेवड्डुउं समर-भरु, निज्जिउ एक्क-खणेण ।। ५३ ।।

युष्माभिरस्माभिर्यत्कृतं तद् बहुकजनेन दृष्टम्; किं कृतम् ? तदाह—तत्तावन्मानः समरभरः एकक्षणेन निर्जित इत्यर्थः ।। ५३ ।।

३७२ तउ होन्तउ आगदो । तुज्झ होन्तउ आगदो ।
तुध्र होन्तउ आगदो ।

'तउ' त्वत्तः 'होन्तउ' भवन्—सन् आगतः । 'तुध्र' त्वत्तः भवन् आगतः । तुज्झ त्वत्तः ।

३७२ तउ गुण-संपइ तुज्झ मदि, तुध्र अणुत्तार खन्ति ।
जइ उप्पत्ति अन्न जण, महि-मंडलि खिक्खन्ति ।। ५४ ।।

महीमण्डलेऽन्ये जना यदि उपेत्य—तव पार्श्वे समागत्य तव गुणसम्पदं शिक्षन्ते, तव मतिं शिक्षते, 'तुध्र' तव अनुत्तरां—प्रधानां 'खंति' क्षमां च तदा वरमिति गम्यते इत्यर्थः ।। ५४ ।।

३७३ तुम्हहं होन्तउ आगदो । तुम्हहं केरउ धणु ।

'तुम्हहं' युष्मभ्यं भवन् सन् आगतः । युष्माकं 'केरउ' सम्बन्धि 'धणु' धनम् ।

३७५ तसु हउं कलिजुगि दुल्लहहो० ( दोहा १३ )

कलियुगे दुर्लभस्य तस्य नरस्याहम्० ।

३७६ अम्हे थोवा रिउ बहुअ, कायर एम्व भणन्ति ।
मुद्धि निहालहि गयण-यलु, कइ जण जोण्ह करन्ति ।।५५।।[1]

'अम्हे' वयं स्तोकाः, 'रिउ' रिपवः शत्रवो बहवः प्रचुरतराः, 'एम्व' इत्थं कातराः भणन्ति—पठन्ति । मुद्धि हे मुग्धे ! सुन्दरि ! गगनतलं 'निहालहि' निभालय विलोकय, 'कइ' कियन्तो जनाः 'जोण्ह' ज्योत्स्नां कुर्वन्ति ? एकश्चन्द्र एवेत्यर्थः ।। ५५ ।।

३७६ अम्बणु लाइवि जे गया, पहिअ पराया केवि ।
अवस न सुअहिं सुहच्छिअहिं, जिवँ अम्हइं तिवँ तेवि ।।५६।।

'अम्बणु' ममत्वं 'लाइवि' लगयित्वा केऽपि परकीयाः परवश्याः ये पथिका अवश्यं 'न सुअहिं' न स्वपन्ति 'सुहच्छि-

---

१. अम्हे थोड़ा रिउ बहुअ, इउ कायर चिन्तंति ।
मुद्धि निहालहि गयणयलु, कइ उज्जोउ करंति ।।
— कुमारपालप्रतिबोधे पृ. २५७

अहिं' सुखासिकायां-शय्यायाम् । यथा वयं तथा तेऽपि प्रथिकाः । एतावता यथाऽस्माकं शय्यायां स्वापो नास्ति तथा तेषामपि नास्ति, वियोगित्वात् ।।५६।।

३७७ मइं जाणिउं पिअविरहिअहं, कवि धर होई विआलि ।
णवर मिअंकुवि तिह तवइ, जिह दिणयरु खय-गालि ।।५७।।[1]

हे प्रिये ? मया ज्ञातं विरहितानां पुरुषाणां कापि धराऽवलम्बनं भवति । कदा ? विकाले-सन्ध्याकाले । एतावता विरहितानां नवरं-केवलं 'मिअंकुवि' मृगाङ्कोऽपि 'तिह' तथा तपति, यथा 'खयगालि' क्षयकाले कल्पान्तकाले दिणयरु-दिनकरः ।। ५७ ।।

३७७ पइं मइं बेहिंवि रण गयहिं,० । (दोहा-५२)
मइं मेल्लन्तहो तुज्झु,० । (दोहा-५३)

पइं मइं० इत्यादि (दो. पूर्ववत्,) मइं मेल्लंतहो० इति (दो. पूर्ववत्,)

३७८ तुम्हेहिं अम्हेहिं जं किअउ० ( दोहा-५४ )
'तुम्हेहिं इत्यादि (दो. पूर्ववत्)

३७९ महु होन्तउ गदो । मज्झु होन्तउ गदो ।।
'महु' मत्तः भवन्तः आगतः, मज्झु-मत्तः ।।

३७९ महु कन्तहो बे दोसडा, हेल्लि म झङ्खहि आलु ।
देन्तहो हउं पर उव्वरिअ, जुज्झन्तहो करवालु ।।५८।।

'हेल्लि' हे सखि ! मम कान्तस्य द्वौ दोषौ स्तः, अनर्थकं मा जल्प । कौ द्वौ दोषौ ? तदाह-एक स्तावत् दानं ददतः

1. अयं श्लोकः कुमारपाल प्रतिबोधे वर्तत्ते ।।

सतः 'पर' केवलमहमुद्धरिता, अपरस्तावत् युद्धयतः खड्गमुद्धरितमिति निन्दास्तुतिरित्यर्थः ॥५८॥[1]

३७९ जइ भग्गा पारक्कडा, तो सहि मज्झु पिएण ॥
अह भग्गा अम्हहं तणा, तो तें मारिअडेण ॥५९॥[2]

'हे सखि ? यदि परकीया भग्नास्ततो मम प्रियेण, अथास्माकं सम्बन्धिनश्चेद्भग्नास्ततस्तेनम म भर्त्रा मारितेनेवेत्यर्थः ॥ ५९ ॥

३८२ मुख-कबरि-बन्ध तहे सोह धरहिं,
नं मल्ल-जुज्झु ससि-राहु करहिं ।
तहे सहहिं कुरल भमर-उल-तुलिअ,
नं तिमिर-डिम्भ खेलन्ति मिलिअ ॥६०॥[3]

तस्या मुखकवरीबन्धौ वदनवेणीबन्धौ शोभां धरतः 'नं' उत्प्रेक्ष्यते शशिराहू मल्लयुद्धं कुरुतः । तस्या कुरला:- केशाः शोभन्ते, किम्भूताः ? भ्रमरकुलतुलिताः– समानाः, 'नं' उत्प्रेक्ष्यते तिमिरडिम्भाः–अंधकारबालका मिलित्वा क्रीडन्तीत्यर्थः ॥६०॥

३८३ बप्पीहा पिउ पिउ भणवि, कित्तिउ रुअहि हयास ।
तुह जलि महु पुणु वल्लहइ, बिहुंवि न पूरिअ आस ॥६१॥

---

१. निन्दागर्भिता स्तुतिरित्याशयः ।

२. जइ भग्गा पारक्कडा तो सखि मुज्झपियेण ।
जो भग्गा अम्हेतणा तो सिंह जुज्झयडेण ॥

राजस्थानी दोहा

३. घणसारतारनयणाए गूढ-कुसुमोच्चयो चिहुर-भारो ।
ससि-राहु–मल्ल–जुज्झं व दंसिदमेण-नयणाए ॥
कर्पूरमंजर्याम् २-११

'बप्पीहा' हे चातक ! पिउ पिउ इति भणित्वा, स्त्रीपक्षे प्रियः प्रियः इति भणित्वा 'कित्तिउत्ति' कियद्वारं त्वं 'रुअहि' रोदिषि । हे हताश ! तव जले-पानीये पुनर्मम वल्लभे-प्रिये 'बिहुंवि' द्वयोरपि आशा न पूरिता ॥६१॥

३८३ बप्पीहा काइं बोल्लिएण, निग्घिण वारइवार ।
सायरि भरिअइ विमल-जलि, लहहि न एक्कइधार ॥६२॥

'बप्पीहा निग्घिण' हे निर्लज्ज चातक ! 'वारइवार' वारंवारं 'बोल्लिएण' कथितेन 'काइं' किमस्ति । विमल जलेन सागरे भृते एकामपि धारां न लभसे इत्यर्थः ॥६२॥

३८३ आयहिं जम्महिं अन्नहिं वि, गोरि सु दिज्जहि कन्तु ।
गय मत्तहं चत्तङ्कुसहं, जो अब्भिडइ हसन्तु ॥६३॥

'आयहिं' अस्मिन् 'जम्महिं' जन्मनि अन्यस्मिन्नपि मम गौरि हे पार्वति ! 'सु' सः कान्तः दीयताम् । मत्तानां-गजानां त्यक्ताङ्कुशानां यो हसन् सन् अभ्येति सन्मुखं याति ॥६३॥

३८४ बलि अब्भत्थणि महुमहणु, लहुइहूआ सोइ ।
जइ इच्छहु वड्डत्तणउं, देहु, म मग्गहु कोइ ॥६४॥

बलिराजस्य प्रार्थने सोऽपि मधुमथनः नारायणः लघुकीभूतः, अतः 'जइ' यदि वृद्धत्वं यूयमिच्छथ तदा दानं ददथ । 'म मग्गहु' मा मार्गयथ, कस्यापि पार्श्वे मार्गणं न कार्यमिति भावः ॥६४ ।

३८५ विहि विनडउ पीडन्तु गह, मं धणि करहि बिसाउ ।
संपइ कड्ढउं वेस जिवं, छुडु अग्घइ ववसाउ ॥६५॥

विघिनंटतु, ग्रहाः पीडयन्तु, हे प्रिये ! मा विषादं कुरु, वेषमिव सम्पदं कर्षयामि, अथवा वेश्यामिव कर्षयामि, यथा वेश्या द्रव्येणाकर्ष्यते, 'छुडु' यदि व्यवसाय उद्यमोऽर्घति विद्यते ('अग्घइ' राजते) तदा सम्पदः सुलभा इत्यर्थः ।।६५।।

३८६ खग्ग-विसाहिउ जहिं लहहुं, पिय तहिं देसहिं जाहुं ।
रण-दुब्भिक्खें भग्गाइं, विणु जुज्झें न वलाहुं ।।६६।।

हे प्रिये ! यस्मिन् देशे खड्गेनापि साधितं लभामहे तस्मिन् देशे यामः । वयं रणदुर्भिक्षेण भग्ना युद्धेन विना न वलामहे न रतिं प्राप्नुम इत्यर्थः ।।६६।।

३८७ कुञ्जर सुमरि म सल्लइउ, सरला सास म मेल्लि ।
कवल जि पाविय विहि-वसिण, ते चरि माणु म मेल्लि ।।६७।।[1]

हे कुञ्जर ! मा स्मर सल्लकीः, सरलान् दीर्घान् निःश्वासान् मा मुञ्च, विधिवशेन ये कवलाः प्राप्तास्तान् चर, मा मानं मुञ्चेत्यर्थः ।।६७।।

३८७ भमरा एत्थु वि लिम्बडइ, केवि दियहडा विलम्बु ।
घण-पत्तलु छाया-बहुलु, फुल्लइ जाम कयम्बु ।।६८।।[2]

हे भ्रमर ! अत्रापि निम्बे तावत् कति दिवसान् विलम्बस्व, यावत् घनपत्रवान् छाया बहुलः कदम्बः प्रफुल्लतीत्यर्थः ।। ६८ ।।

३८७ प्रिय एम्वहिं करे सेल्लु, करि, छड्डहि तुहुं करवालु ।
जं कावालिय बप्पुडा, लेहिं अभग्गु कवालु ।। ६९ ।।

---

१. मा सुमरसु चन्दण-पल्लवाण, करि-णाह गेण्ह तिण-कवलं ।
जं जह परिणमइ दसा, तं तह धीरा पडिच्छंति ।।
वज्जालग्गे १९२

२. छप्पय गमेसु कालं वासव-कुसुमाइ ताव मा मुयसु ।
मन्ने जियन्तो पेच्छसि पउरा रिद्धी वसंतस्स ।।
वज्जालग्गे २४४

हे प्रिये ! इदानीं शल्यं कुन्तं करे कुरु, त्वं करवालं मुञ्च, येन वराकाः कापालिका योगिनः अभग्नं कपालं गृह्णन्ति ॥६९॥

३८८ दिअहा जन्ति झडप्पडहिं, पडहिं मणोरह पच्छि।
जं अच्छइ तं माणिअइ, होसइ करतु म अच्छि ॥७०॥

दिवसा वेगैर्यान्ति, मनोरथाः पश्चात्पतन्ति, यदस्ति तन्मान्यते, कोऽर्थः–दीयते भुज्यते। भविष्यतीति कुर्वन् मा 'अच्छि' मा आस्व मा तिष्ठेत्यर्थः ॥७०॥

३८९ सन्ता भोग जु परिहरइ, तसु कन्तहो बलि कीसु।
तसु दइवेणवि मुण्डियउं, जसु खल्लिहडउं सीसु ॥७१॥[1]

यः सतो–विद्यमानान् भोगान् परिहरति तस्य कान्तस्य बलि–पूजां क्रिये (करोमीति भावः)। यस्य शीर्षं खल्वाटं तस्य दैवेनैव मुण्डितम्, को भावः ? यस्य भोगा न सन्ति स तु स्वयमेव त्यजतीत्यर्थः ॥७१॥

३८९ बलि किज्जउं सुअणस्सु०। पूर्ववत् (दोहा १३)

३९० अइ तुंगत्तणु जं थणहं, सो छेयउ न हु लाहु।
सहि जइ केवइ तुडि-वसेण, अहरि पहुच्चइ नाहु ॥७२॥

यत् स्तनानां अतितुंगत्वं तच्छेदकं न तु लाभः। हे सखि ! यदि कथमपि त्रुटिवशेन कालविलम्बेन नाथोऽधरे प्रभवति, अन्यथा न लगत्येव, स्तनयोरतितुङ्गत्वात् ॥७२॥

३९१ बुवह सुहासिउ किंपि।

ब्रूत सुभाषितम् किमपि ॥

---

१. संता विसय जु परिहरइ वलि किज्जउं हउं तासु।
सो दइवेण जि मुण्डिअउ सीसु खडिल्लउ जासु ॥
परमात्मप्रकाशे २-१३९

३९१ इत्तउं ब्रोप्पिणु सउणि ठिउ, पुणु दूसासणु ब्रोप्पि ।
तो हउं जाणउ एहो हरि, जइ महु अग्गइ ब्रोप्पि ।।७३।।

दुर्योधनोक्तिरियम्-शकुनिर्भीममातल इयद् उक्त्वा स्थितः, पुनर्दुःशासन उक्त्वा स्थितः, अहं ततस्तर्हि जाने यद्येष हरिर्ममाग्रे उक्त्वा तिष्ठतीत्यर्थः ।।७३।।

३९२ वुजइ । वुञेप्पि । वुञेप्पिणु ।

व्रजति व्रजित्वा ।

३९३ पस्सदि ।

पश्यति ।

३९४ पठ गृण्हेप्पिणु व्रतु

व्रतं गृहित्वा पठ ।

३९५ जिवँ तिवँ तिक्खा लेवि कर, जइ ससि छोल्लिज्जन्तु ।
तो जइ गोरिहे मुह-कमलि, सरिसिम कावि लहन्तु ।।७४।।[1]

यथा तथा शशी तीक्ष्णामुखानि लात्वा करान् यद्यतक्षिष्यत, ततो जगति गौर्याः चन्द्राननायाः मुखकमलेन सह कामपि सदृशतामलप्स्यतेत्यर्थः ।।७४।।

३९५ चूडुल्लउ चुण्णीहोइसइ, मुद्धि कवोलि निहित्तउ ।
सासानल-जाल-झलक्किअउ, वाह-सलिल-संसित्तउ ।।७५।।[2]

हे मुग्धे ! कपोले निहितः स्थापितः चूटकश्चूर्णीभविष्यति । किम्भूतश्चूटकः ? श्वासानलज्वालादग्धः । पुनः

१. पण्डुरं जइवि रज्जए मुहं कोमलङ्गि खडिवास्सेण ।
दिज्जए पुण कवोल-कज्जलं ता लहेज्ज ससिणो विडम्बणं ।।
कर्पूरमञ्जर्याम् ३।३२

२. चुडउ चुण्णीहोइसइ, मुद्धिकवोलि निहत्तु ।
सासानलिण झलक्कियउ, वाहसलिलसंसित्तु ।।
कुमारपालप्रतिबोधे पृ० १०८

किंभूतः ? वाष्पसलिलसंसिक्त इत्यर्थः ॥७५॥

३९५ अब्भड वंचिउ बे पयइं, पेम्मु निअत्तइ जावँ ।
सव्वासण-रिउ-संभवहो, कर परिअत्ता तावँ ॥७६॥

द्वे पदे 'अब्भड' अनुव्रज्य वंचित्वा वंचितो वा यावत् 'पेम्मु' स्नेहं कश्चित्पुमान् निर्वर्तयति, अथवा प्रेमशब्देन प्रिया वाच्या अभेदोपचारात्, यथा प्रेमवती तथा प्रेमापि प्रिया। प्रियमिति शेषः, तावत् सर्वाशनरिपुसम्भवश्चन्द्रः सर्वाशनो वैश्वानरः, तस्याग्ने रिपुः सागरः तस्मात् संभव उत्पत्तिर्यस्यासौ, एतावता चन्द्रः तस्य कराः किरणाः 'परिअत्ताः' प्रसृताः। एतावता चन्द्रोद्गमने उभयोः स्नेहवृद्धो गमनागमनं जातम् ॥७६॥

३९५ हिअइ खुडुक्कइ गोरडी, गयणि घुडुक्कइ मेहु ।
वासा-रत्ति-पवासुअहं, विसमा संकडु एहु ॥७७॥

गोरी स्त्री हृदये 'खुडुक्कइ' शल्यायते। मेघो गगने गर्जति। वर्षारात्रे प्रवासिनां चलितानां पथिकानां विषमं सङ्कटमेतदित्यर्थः ॥७७॥

३९५ अम्मि पओहर वज्जमा, निच्चु जे सम्मुह थन्ति ।
महु कन्तहो समरङ्गणइ, गय-घड भज्जिउ जन्ति ॥७८॥

स्त्री कथयति—हे अम्ब ! मम पयोधरौ वज्रसमौ स्तः, यौ नित्यमेतस्य मम कान्तस्य सन्मुखौ तिष्ठतः। एतस्येति कस्य ? यस्याग्रे गजघटाः समराङ्गणे भङ्क्त्वा यान्तीत्यर्थः ॥७८॥

३९५ पुत्ते जाएं कवणु गुणु, अवगुणु कवणु मुएण ।
जा बप्पीकी भुंहडी, चम्पिज्जइ अवरेण ॥७९॥

जातेन पुत्रेण को गुणः, मृतेन पुत्रेण कोऽप्यगुणः। येन पुत्रेण सतेति गम्यते या पैतृकी भूमिरपरेणाक्रम्यते गृह्यते इत्यर्थः ॥७९॥[1]

३९५ तं तेत्तिउ जलु सायरहो, सो तेवडु वित्थारु ।
तिसहे निवारणु पलुवि नवि, पर धुद्धुअइ असारु ॥८०॥

तत्तावज्जलम्, स तावन्मात्रो विस्तारः, परं-केवलं तृषाया निवारणं पलमपि नैव स्यादिति शेषः, असारः सन् शब्दायते इत्यर्थः ॥८०॥

३९६ जं दिट्ठउं सोम-ग्गहणु, असईहिं हसिउ निसंकु ।
पिअ-माणुस-विच्छोह-गिलिगिलि राहु मयङ्कु ॥८१॥[2]

यत्सोमग्रहणं दृष्टं तन्निःशङ्कं यथा स्यात्तथाऽसतीभिः स्त्रीभिर्हसितः सोमः। हे राहो ! प्रियाणामभिष्टानां मनुष्याणां विक्षोभो वियोगः तस्य 'गरु' करं (तं करोतिति) मृगाङ्कं गिल गिल त्वं भक्षय भक्षय इत्यथः ॥८१॥

३९६ अम्मीए सत्थावत्थेहिं, सुधिं चिन्तिज्जइ माणु ।
पिए दिट्ठे हल्लोहलेण, को अप्पाणु ॥८२॥

'अम्मीए' हे अम्बिके ? हे मातः ? स्वस्थावस्थैः स्वस्थ-चित्तैः 'सुधिं' सुखेन मानोऽहंकारश्चिन्त्यते। परं प्रियेऽभीष्टे दृष्टे सति 'हल्लोहलेण' व्याकुलत्वेनात्मानं कः पुमान् 'चेअइ' जानाति ॥८२॥

---

१. बेटां जायां कवण गुण अवगुण कवणु मिएण ।
जां उभा घर आपणी गंजीजै अवरेण ॥
राजस्थानी दोहा

२. रे रे विडप्प मा मुयसु दुज्जणं गिलसु पुण्णिमायन्द ।
वज्जालग्गे ४८३

३९६ सवधु करेप्पिणु कधिदु मइं, तसु पर सभलउं जम्मु ।
जासु न चाउ न चारहडि, नय पम्हट्ठउ धम्मु ।।८३।।

शपथं कृत्वा मया कथितम्, परं-केवलं तस्य जन्म सफलम् । यस्य त्यागो न प्रभ्रष्टः-न प्रमुषितः दान न गतम् । यस्य चारभटी न प्रमुषिता न भ्रष्टा शूरवृत्तिर्न गता । यस्य धर्मो न प्रमुषितो न प्रभ्रष्ट इत्यर्थः । अस्यापरा व्याख्या-'मइं' मया 'सवधु' शपथं 'करेप्पिणु' कृत्वा, कधिदु कथितम्, 'तसु' तस्य नरस्य 'पर' परं 'सभलु' सफलं 'जम्मु' जन्म । यस्य न 'चाउ' अपव्ययो नास्ति । यस्य न 'चारहडि' आरभटी-प्रकृति र्नास्ति । न च 'धम्मु' धर्म्मः 'पम्हट्ठउ' प्रभ्रष्टः ।।८३।।

गिलि० इत्यादि पूर्ववत् (दोहा ८२)
एक्कहिं० इत्यादि पूर्ववत् (दोहा ३२) ।

३९६ जइ केवँइ पावीसु पिऊ, अकिआ कुड्डु करीसु ।
पाणीउ नवइ सरावि जिवँ, सव्वङ्गे पइसीसु ।।८४।।

स्त्री कथयति-यदि कथंचित् प्रियं प्राप्स्यामि तर्हि अकृतं कौतुकं करिष्यामि । यथा नवे शरावे पानीयं सर्वाङ्गेण प्रविशति, तथा सर्वाङ्गेण प्रवेक्ष्यामीत्यर्थः ।।८४।।

३९६ उअ कणिआरु पफुल्लिअउ, कञ्चण कान्ति-पयासु ।
गोरी-वयण-विणिज्जिअउं, नं सेवइ वणवासु ।।८५।।

त्वं पश्य, कर्णिकारवृक्षः प्रफुल्लितः, किम्भूतः ? कांचनकान्तिप्रकाशः । 'नं' उत्प्रेक्ष्यते-गौरीवदननिर्जितः सन् वनवासं सेवते इत्यर्थः ।।८५।।

३९७ तसुपर सभलउ जम्मु०
इत्यादि पूर्ववत् (दोहा ८४)

३९८ जइ केवइ पावीसु पिउ०

इत्यादि पूर्ववत् (दोहा ८५)

३९८ जइ भग्गा पारक्कडा तो सहि मज्झु प्रियेण

इत्यादि पूर्ववत् (दोहा ६०)

३९९ वासु महारिसि एउ भणइ, जइ सुई-सत्थु पमाणु ।
मायहं चलण नवन्ताहं, दिवि दिवि गङ्गा-ण्हाणु ॥८६॥

व्यासो महर्षिः एतद्भणति-यदि श्रुतिशास्त्रं प्रमाणम्, तर्हि मातृणां जननीनां चरणौ नमतां सतां दिवसे दिवसे गङ्गास्नानमित्यर्थः ॥८६॥

३९९ वासेणवि भारह-खम्भि बद्ध ।

व्यासेनापि भारतस्तम्भे बद्धाः ॥

४०० अनउ करन्तहो पुरिसहो आवइ ।

अन्यायं कुर्वतः पुरुषस्य आपत्-विपत् आयाति । न्यायं कुर्वतः पुरुषस्य द्भवति ॥

गुणहिं न संपय कित्ति पर० । इति पूर्ववत् ॥ (दोहा १०)

४०१ केम समप्पउ दुट्ठु दिणु, किध रयणी छुडु होइ ।
नव-वहु- दंसण-लालसउ, वहइ मणोरह सोइ ॥८७॥

दुष्टो दिनः कथं समाप्यताम् । रात्रिः कथं भवति छुडु शीघ्रम् । सोऽपि नववधूदर्शनलालस एवंविधानिति शेषः, मनोरथान् वहतीत्यर्थः ॥८७॥

४०१ ओ गोरी-मुह-निज्जिअउ, वद्दलि लुक्कु मियंकु ।
अन्नुवि जो परिहविय-तणु, सो किवँ भवँइ निसङ्कु ॥८८॥

'ओ' सूचनायां गौरीमुखविनिर्जितो मृगाङ्को वार्दले निलीनः । अन्योऽपि यः परिभूततनुः स निःशङ्कं कथं भ्रमतीत्यर्थः ॥८८॥

४०१ बिम्बाहरि तणु रयण-वणु, किह ठिउ सिरिआणन्द ।
निरुवम रसु पिएं पिअवि जणु, सेसहो दिण्णी मुद्द ।।८९।।

हे श्री आनन्द ! अथवा श्री आनन्दं शोभाकरं रदनव्रणं दन्तव्रणं कथं स्थितम् ? । कथमिति प्रश्ने । क्व ? बिम्बाधरे, कस्याः ? तन्व्याः स्त्रियाः । उत्तरं ददाति–'जणु' उत्प्रेक्ष्यते, प्रियेणाधरस्य निरुपमं रसं पीत्वा शेषरसस्य मुद्रा दत्तेत्यर्थः ।।९८।।

४०१ भण सहि निहुअउ तेवँ मइं, जइ पिउ दिट्ठु सदोसु ।
जेवँ न जाणइ मज्झु मणु, पक्खावडिअं तासु ।।९०।।

हे सखि ! मां प्रति निभृतं छन्नं यथा स्यात्तथा भण कथय, यदि त्वया प्रियः सदोषो दृष्टः । तस्यान्यतरस्य पक्षापतितं पार्श्वे स्थितं मम मनो यथा न जानाति भर्त्तेति गम्यते, ममाग्रे त्वया छन्नं वाच्यमित्यर्थः ।।९०।।

जिवँ जिवँ०–इति पूर्ववत् मइं जाणिउ० इत्यादि पूर्ववत् ( दो० )

४०२ मइं भणिअउ बलिराय तुहुं, केहउ मग्गण एहु ।
जेहु तेहु नवि होइ वढ, सइं नारायणु एहु ।।९१।।

हे बलिराज ! मया त्वं भणितः, कीदृग् ? मार्गण एषः । बलिराइ–यादृग् तादृग् न भवति, रे मूर्ख ! ईदृग् स्वयं नारायण इत्यर्थः ।।९१।।

४०४ जइ सो घडदि प्रयावदी, केत्थुवि लेप्पिणु सिक्खु ।
जेत्थुवि तेत्थुवि एत्थु जगि, भण तो तहि सारिक्खु ।।९२।।

यदि स प्रजापतिः कुत्रापि शिक्षां लात्वा यत्रापि तत्रापि जगति घटयति, तर्हि भण कथय, तस्याः सादृश्यं को घटयतीत्यर्थः ।।९२।।

केत्थुवि० इत्यादि पूर्ववद् व्याख्या ।।

४०६ **जाम** न निवडइ कुंभ-यडि, सीह्-चवेड चडक्क ।
**ताम** समत्तहं मयगलहं, पइ-पइ वज्जइ ढक्क ।।९३।।

यावत् कुम्भतटे सिंह-चपेटाचटत्कारो न निपतति, तावत् समस्तानां मदकलानां गजानां पदे पदे ढक्का वाद्यते इत्यर्थः ।।९३।।

४०६ तिलहं तिलत्तणु **ताउं** पर, **जाउं** न नेह् गलन्ति ।
नेहि पणट्ठइ तेज्जि तिल, तिल फिट्टवि खल होन्ति ।।९४।।[1]

पर-केवलं तिलानां तिलत्वं तावत्, यावत् स्नेहो न गलति । स्नेहे प्रनष्टे त एव तिलाः तिलाद् भ्रष्टाः खला भवन्तीत्यर्थः ।।९४।।

४०६ **जामहिं** विसमी कज्ज-गइ, जीवहं मज्झे एइ ।
**तामहिं** अच्छउ इयरु जणु, सुअणुवि अन्तरु देइ ।।९५।।

यावज्जीवानां मध्ये विषमा कार्यगतिरायाति ताबदास्तामितरजनः, परं स्वजनोऽपि अन्तरं ददाति पृष्ठं ददातीत्यर्थः ।।९५।।

**जेवडु** अन्तरु रावण रामहं,
**तेवडु** अन्तरु पट्टण गामहं ।

'जेवडु' यावन्मात्रं रावणरामयोरन्तरमस्ति, 'तेवडु' तावन्मात्रं अन्तरं ग्रामपट्टणयोः समस्ति ।।

४०९ ते मुग्गडा हराविआ, जे परिविट्ठा ताहं ।
**अवरोप्परु** जोअन्ताहं, सामिउ गंजिउ जाहं ।।९६।।

---

१. तावच्चिय ढलहलया जावच्चिय नेहपूरियसरीर ।
सिद्धत्था उण छेया नेहविहूणा खलीहुन्ति ।।

वज्जालग्गे ५५९

ये तेषां परिवेषिताः ते मुद्गाः हारिता मुधा जाताः, येषां 'अवरोप्पर' परस्परं जोअन्ताहं (पश्यताम्) युध्यतां सतां स्वामी गञ्जितः—पीडित इत्यर्थः ॥

सुधें०, तसुहउं०, अन्नु जु०, बलि०, दइवु०, तरुहुं०, खग्गविसाहिउ०, तणहुं० इत्यादी पूर्ववत् ॥

४१२ बम्भ ते विरला केवि नर, जे सव्वङ्ग-छइल्ल ।
जे वङ्का ते वञ्चयर जे उज्जुअ ते वइल्ल ॥९७॥

हे ब्रह्मन् ! ते केऽपि नरा विरलाः, ये 'सव्वंगछइल्ल सर्वाङ्गैर्दक्षाः । ये वक्रास्ते वंचकतरा अत्यर्थवञ्चकाः । ये तु ऋजवस्ते बलीवर्दाः मूर्खा इत्यर्थः ॥९७॥

४१४ अन्ने ते दीहरलोअण, अन्नु तं भुअ-जुअलु ।
अन्नु सु घण थण-हारु, तं अन्नु जि मुह-कमलु ॥
अन्नु जि केस-कलावु, सु अन्नु जि प्राउ विहि ।
जेण णिअम्बिणि घडिअ, स गुण-लायण्ण-णिहि ॥९८॥

ते दीर्घलोचने अन्य एव, अन्यदेव तद् भुजयुगलम्, सोऽन्यो घनस्तनभारः घनो-निविडः, तदन्यदेव मुखकमलम्, अन्य एव स केशपाशः, प्रायः स विधिरन्य एव, येन सा नितम्बिनी घटिता । किम्भूता सा गुणलावण्यनिधिरित्यर्थः ॥९८॥

४१४ प्राइव मुणिहंवि भन्तडी, तें मणिअडा गणन्ति ।
अक्खइ निरामइ परम-पइ, अज्जवि लउ न लहन्ति ॥९९॥

'प्राइव' प्रायो मुनीनामपि भ्रान्तिः, 'तें' तेन कारणेन मुनयो मणिकान् गणयन्ति । अक्षये निरामये परमपदे सिद्धिलक्षणे स्थाने यदद्यापि लयं न लभन्ते । अतः किं शून्यध्यानेनेत्यर्थः ॥९९॥

४१४ असु-जलें प्राइम्ब गोरिअहे, सहि उव्वत्ता नयण-सर ।
तें सम्मुह संपेसिआ, देन्ति तिरिच्छी घत्त पर ॥१००॥

हे सखि ! प्रायो गौर्या अश्रुजलेन नयनसरसो उद्वृते उल्लसिते, तेनापरे नयनसरसी सम्मुखे प्रेषिते, परं-केवलं तिर्यग्घातं दत्त इत्यर्थः ।।१००।।

४१४ एसी पिउ रूसेसु हउं, रुट्ठी मइं अणुणेइ ।
पग्गिम्व एइ मणोरहइ, दुक्करु दइउ करेइ ।।१०१।।

प्रिये एष्यति समागमिष्यति अहं रुषियामि । रुष्टां मामनुनयति ( भाषायाम् ) मनावइ । प्रायो दयिता एतान्मनोरथान् दुष्करान् करोति, इष्टकाले समागमनादित्यर्थः ।।१०१।।

४१५ विरहानल-जाल-करालिअउ,
पहिउ कोवि बुड्डिवि ठिअओ ।
अनु सिसिर-कालि सीअल-जलहु,
धूमु कहन्तिहु उट्ठिअओ ।।१०२।।

कोऽपि कविर्जले धूमं दृष्ट्वा प्राह-कोऽपि पथिको विरहानलज्वालाकरालितः पीडितो ब्रुडित्वा स्थितोऽस्ति । अन्यथा शिशिरकाले शीतजलाद्धूमः कुत इत्यर्थः ।।१०२।।

४१६ महु कन्तहो गुट्ठ-ट्ठिअहो, कउ झुम्पडा बलन्ति ।
अह रिउ-रुहिरें उल्हवइ, अह अप्पणें न भन्ति ।।१०३।।

गोष्ठस्थितस्य मम कान्तस्य कुतः कुटिरकाणि ज्वलन्ति । अथ रिपुरुधिरेण विध्यापयति, अथात्मना येन न भ्रान्तिरित्यर्थः ।।१०३।।

अइ भग्गा० व्याख्या पूर्ववत् ।।

४१८ पिय-संगमि कउ निद्दडी, पिअहो परोक्खहो केम्व ।
मइं बिन्निवि विन्नासिआ, निद्द न एम्व न तेम्व ।।१०४।।

प्रियसंगमे कुतो निद्रा ? प्रियस्य परोक्षस्य 'सप्तम्याः' प्रिये परोक्षे सति कथं निद्रा ? मया द्वे अपि विनाशिते

क्षयं नीते। द्वाभ्यां संयोगवियोगाभ्यां निद्रा न एव न तथेत्यर्थ: ।।१०४।।

मुग्गहिं न सपथं किसि पर० । व्याख्या पूर्ववत् ।

४१८ कन्तु जु सीहहो उवमिअइ, तं महु खडिउ माणु ।
सीहु निरक्खय गय हणइ, पिउ पय-रक्खसमाणु ।।१०५।।

कान्तो यदि सिंहेन सहोपमीयते, तदा मम मान: खण्डित: । सिंहो नीरक्षकान्-रक्षपालरहितान् गजान् हन्ति । प्रिय: पदरक्षै: समं-पदातिरक्षै: सह गजान् रणे हन्ति । (सिंहादधिक पराक्रमवान् मम कान्त इत्यर्थ: ) ।।१०५।।

४१८ चंचलु जीविउ ध्रुवु मरणु, पिअ रूसिज्जइ काइ ।
होसइं दिअहा रूसणा, दिव्वइं वरिस-सयाइं ।।१०६।।

जीवितं चञ्चलम्, मरणं ध्रुवम्, हे प्रिये ! रुष्यते कथम् ? रोषणस्य दिवसो दिव्यानि वर्षशतानि भविष्यति ( दिवसो विरहेण दिव्यवर्षशततुल्यदीर्घो भविष्यति) इत्यर्थ: ।।१०६।।

४१८ माणि पणट्ठइ जइ न तणु, तो देसडा चइज्ज ।
मा दुज्जण-कर-पल्लवेहिं, दंसिज्जन्तु भमिज्ज ।।१०७।।[1]

माने प्रनष्टे यदि तनुर्न त्यज्यते, ततो देशस्त्यज्यते । परं दुर्ज्जनकरपल्लवैर्द्दर्श्यमानो मा भ्राम्य ।।१०७।।

४१८ लोणु विलिज्जइ पाणिएण, अरि खलमेह म गज्जु ।
बालिउ गलइ सु झुम्पडा, गोरी तिम्मइ अज्जु ।।१०८।।

हे मेघ ! मा गर्ज्ज, लवणं-सामुद्रं पानीयेन विलीयते, ज्वालितो मेघो गलति, अद्य सकुटीरिका गौरी तिम्यते भीजइ (भाषायाम्) इत्यर्थ: । द्वितीयप्रकारेण व्याख्या-अरि-अरे हे खलमेघ हे दुर्ज्जनमेघ! 'बालिउ' ज्वालितस्त्वं 'म गज्जु'

१. अयं श्लोक: कुमारपालप्रतिबोधे वर्तते पृ. १२ ।।

मा गज्ज । यतः गौर्याः 'लोणु' लावण्यं पाणिएण-पानीयेन विलिज्जइ-विलीयते, 'सु'-तत् 'झुम्पडी' कुटीरकं 'गलइ'-गलति श्च्योतति, गौरी-नारी 'तिम्मइ' आर्द्री भवति ॥१०९॥

४१८ विहवि पणट्ठइ वंकुडउ, रिद्धिहिं जण सामन्नु ।
किंपि मणाउं महु पिअहो, ससि अणुहरइ न अन्नु ॥१०९॥

विभवे प्रनष्टे सति सामान्यो जनो लोकः ऋद्धया श्रिया वक्रीस्यात् । 'मणाउं' मनाक् 'ससित्ति' चन्द्रः 'महु' मम 'पियहो' प्रियस्य अनुहरते सादृश्यं घत्ते नान्यः कोऽपि । भावार्थस्त्वयं यथा चन्द्रस्य तारका वक्रा भवन्ति, तथा मम प्रियस्य निर्द्धनस्य अन्ये जना वक्रा भवन्ति ॥१०९॥

४१९ किर खाइ न पिअइ न विद्दवइ,
धम्मि न वेच्चइ रूअडउ ।
इह किवणु न जाणइ जह,
जमहो खणेण पहुच्चइ दूअडउ ॥११०॥

'किर' किल खादति, न पिबति, न ददाति, धर्मे रूपकं न व्ययति, इह कृपणो न जानाति-यथा यमस्य दूतः क्षणेन प्रभवतीत्यर्थः ॥११०॥

४१९ जाइज्जइ तहिं देसडइ, लब्भइ पियहो पमाणु ।
जइ आवइ तो आणिअइ, अहवा त जि निवाणु ॥१११॥

तस्मिन् देशे 'जाइज्जइ' गम्यते, यत्र पियहो प्रियस्य 'पमाणु' प्रमाणं शुभाशुभादिस्वरूपं लभ्यते, 'जइ' यदि आयाति तदा प्रतिस्वरूपं 'आणिअइ' आनीयते, अथवा 'तं जि' तदेव निर्वाणस्थानमाश्रीयते ॥१११॥

दिवि दिवि गंगा-ण्हाणु ॥ व्याख्या पूर्ववत् ।

४१९ जउ पवसन्ते सहुं न गयअ, न मुअ विओएँ तस्सु ।
लज्जिज्जइ संदेसडा, दिन्तिहिं सुहय–जणस्सु ।।११२।।[1]

(कस्याश्चित् प्रोषितभर्तृकायाः सखीं प्रत्युक्तिः)–यदि प्रवसता–प्रवासं कुर्वता प्रियेण सह न गता, अथ तस्य वियोगेन न मृता । तर्हि तस्य सुभगजनस्य संदेशान् ददतीभिरस्माभिर्लज्यते इत्यर्थः ।।११२।।

४१९ एत्तहे मेह पिअन्ति जलु; एत्तहे वडवानल आवट्टइ ।
पेक्खु गहीरिम सायरहो, एक्कवि कणिअ नांहि ओहट्टइ ।११३।

हे नाथ ! इतः–अस्मिन् पार्श्वे मेघा जलं पिबन्ति । इतः अस्मिन् पार्श्वे वडवाग्निः जलं 'आवट्टइ'–आवर्तते शोषयति । त्वं पश्य सागरस्य 'गहीरिम' गम्भीरत्वम्, एकोऽपि कणिको बिन्दुमात्रमपि 'नांहि' नहि ओहट्टइ–हीनतां याति ।।११३।।
पच्छइ होइ विहाणु । एम्वइ सुरउ समत्तु । व्याख्या पूर्ववत्

४२० जाउ म जन्तउ पल्लवह, देक्खउं कइ पय देइ ।
हिअइ तिरिच्छी हउं जि पर पिउ डम्बरइं करेइ ।।११४।।

(कश्चित्) स्त्री कथयति–याति तदा यातु, पल्लवं वस्त्रांचलं गृहीत्वा 'म जंतउ', मां रक्षतु यातुः पुरुषस्य पत्युः, पश्यामि, अयं पतिः कति पदानि दत्ते । पुनर्हृदये अहं 'जि' एवार्थे, तिरिच्छि तिर्यग् भूता ( भाषायाम् ) आडीरही छउं । परं केवलं प्रिय आडम्बराणि करोति न तु यास्यतीत्यर्थः ।।११४।।

---

१. जसुपवसंत न पवसिया मुइअ वियोइ न जासु ।
लज्जिज्जउ संदेसडउ दिती पहिय पियासु ।।
संदेशरासके ७०

४२० दूरि नच्चाविउ पङ्कणइ, विम्हइ पाडिउ लोउ ।
एम्वहि राह-पओहरहं, ज भावइ तं होउं ।।११५।।

वलिदैत्येन नारायण: प्रांगणे नृत्यापित: ( नर्तित ) विस्मये लोक: पातित: । इदानीं राधापयोधरयो: गोपाङ्गना-पयोधरयो: यत्प्रतिभाति तद्भवतु ।।११६।।

४२० साव-सलोणी गोरडी, नवखी कवि विस-गण्ठि ।
भडु पच्चलिउ सो मरइ, जासु न लग्गइ कण्ठि ।।११७।।

सर्वसलावण्या सर्वाङ्गकोमला गौरी भामिनी 'नवखी' नवीना अभिनवा कोऽपि विषग्रन्थि: समस्ति । यस्य कण्ठे न लगति ' पच्चुलिउ ' प्रत्युत स सुभट: स पुमान् ' मरइ ' म्रियते । अन्या विषग्रन्थि: स्यात्सा कण्ठे बिलग्ना सती मारयति, इयं गौरीरूपा विषग्रन्थि: कण्ठेऽलग्ना मारयतीत्यर्थ: ।।११६।।

४२१ मइं वुत्तउं तुहुं धुरु धरहि, कसरेंहि विगुत्ताइं ।
पइं विणु धवल न चडइ भरु, एम्वइ वुन्नउ काइं ।।११७।।

हे धवल हे वृषभ ! कसरेंहिति-दम्यै: कलोलडकैर्विगुप्ता:, भारस्त्वया विना न चटति, एवं किं विषादवान् किं विषदप्राप्त:, पुन: पूर्वं मयोक्तं यत्त्वं धुरु-धरं धरहिति-धूर्भारमुत्पाटयेत्यर्थ: ।।११८।।

मइं वुत्तउं. जं मणु विच्चि न माइ ।। व्याख्या-पूर्ववत् ।

४२२ एक्कु कइअ ह वि न आवही, अन्नु वहिल्लउ जाहि ।
मइं मित्तडा प्रमाणिअउ, पइं जेहउ खलु नाहिं ।। ११९।।

ह इति सम्बोधने, कदापि नायाति 'एक्कु' एष नर:, अन्यश्चेत्कदाचिदायाति, तदा वहिल्लउं शीघ्रं याति,

१. अयं श्लोक: सरस्वतीकण्ठाभरणे वर्तते ३–६२ ।।

मित्तडा-हे मित्र मया यादृक् प्रियः अमाषिअउ-अनुज्ञातः तादृग् त्वया खलु-निअपि नांहि-नहि जातः ॥११८॥

४२२ जिवँ सुपुरिस तिवँ घंघलइं, जिवँ नइ तिवँ वलणाइं।
जिवँ डोंगर तिवँ कोट्टरइं, हिआ विसूरहि काइं ॥११९॥

यथा यथा सत्पुरुषा बहवः सन्ति तथा तथा 'घंघलइं' ( भाषायाम्-जगडा ) ( जगटकामि ) भवन्ति, यथा 'नइ' नद्यः तथा वलनानि, यथा पर्वतास्तथा 'कोटरइं'-( भाषायाम् कोतराणि ) हे हृदय ? किं खिद्यसे ? ॥११९॥

४२२ जे छड्डेविणु रयणनिहि, अप्पउं तडि घल्लन्ति।
तहं संखहं विट्टालु परु, फुक्किज्जन्त भमन्ति ॥ १२० ॥

ये शङ्खाः रत्नाकरं समुद्रं 'छड्डेविणु'-त्यक्त्वा आत्मानं तटे क्षिपन्ति, तदा तेषां शंखानां फुत्कुर्वाणा सन्तः परं केवलं 'विट्टालु' अधमजना भ्रमन्ति ॥१२०॥

४२२ दिवेहिं विढत्ताउं खाहि वढ, संचि म एक्कुवि द्रम्मु।
कोवि द्रवक्कउ सो पडइ जेण समप्पइ जम्मु ॥१२१॥

हे 'वढ' हे मूर्ख ! देवार्जितं खाद, 'मा संचित्ति' मा सञ्चय एकमपि द्रम्मम्, यतः किमपि तद्भयं पतति, येन जन्म समाप्यते ॥१२१॥

फोडेन्ति जे हिअडउं अप्पणउं ॥ व्याख्या पूर्ववत् ॥

४२२ एकमेक्कउं जइवि जोएदि, हरि सुट्ठु सव्वायरेण।
तोवि द्रेहि जहिं कहिंवि राही, को सक्कइ संवरेवि दड्ढ-नयणा नेहें पलुट्टा ॥ १२२ ॥[1]

---

1. सव्व गोविउ जइवि जोएइ
हरि सुट्ठु वि आयरेण देइ दिट्ठि जहिं कहिं वि राही।
को सक्कइ संवरेवि डड्ढ-णयण णेहें पलोट्टउ ॥

एकैकं अङ्गं यथा स्यादेवं हरिं नारायणं यद्यपि सुष्ठु सर्वादरेण 'राही' राधा 'जोएदि' विलोकयति, तथाऽपि "दड्ढनयणा नेहिंसि" दृढदृष्टिरागस्नेहेन यस्मिन्नङ्गप्रदेशे कस्मिन्नङ्गप्रदेशे स्थापितां सतीं दृष्टिं संवरीतुं कः शक्नोति समर्थो भवति ॥ १२२ ॥

४२२ विहवे कस्सु थिरत्तणउं, जोव्वणि कस्सु मरट्टु ।
सो लेखडउ पट्ठाविअइ, जो लग्गइ निच्चट्टु ॥ १२३ ॥

विभवे द्रव्ये सति कस्य स्थिरत्वं भवति, यौवने कस्य 'मरट्टु' अहंकारो भवति । तथापि स एव लेखः प्रेष्यते यो 'निच्चट्टु' गाढं अत्यर्थं लगति ॥ १२३ ॥

४२२ कहिं ससहरु कहिं मयरहरु, कहिं बरिहिणु कहिं मेहु ।
दूर-ठिआहं वि सज्जणहं, होइ असड्ढलु नेहु ॥१२४॥[1]

'कहिं' क्व ससहरु-शशधरश्चन्द्रः, क्व मकरधरः समुद्रः, क्व बर्हिः मयूरः क्व मेघः, दूरस्थितानामपि सज्जनानां असड्ढलु-असाधारणो निरुपमः स्नेहो भवति ॥ १२४ ॥

४२२ कुंजरु अन्नहं तरुअरहं, कोड्डेण घल्लइ हत्थु ।
मणु पुणु एक्कहिं सल्लइहिं, जइ पुच्छह परमत्थु ॥१२५॥

कुञ्जरोऽन्येषु तरुवरेषु कौतुकेन हस्तं क्षिपति, मनः पुनरेकस्यां सल्लक्याम् यदि पृच्छत परमार्थमित्यर्थः ।१२५।

---

१. गयणट्ठिओ वि चन्दो आसासइ कुमुय-सण्डाइं ।
वज्जालग्गे ७७

दूरट्ठिओ वि चन्दो सुणिव्वुइ कुणइ कुमुयाणं ।
वज्जालग्गे ७८

कत्तो उग्गमइ रवी, कत्तो वियसन्ति पङ्कय-वयणाइं ।
सुयणाण जत्थ नेहो, न चलइ दूरट्ठियाणं पि ॥
वज्जालग्गे ८०

४२२ खेड्डयं कयमम्हेहिं, निच्छयं किं पयम्पह ।
अणुरत्ताउ भत्ताउ, अम्हे मा चय सामिअ ।। १२६ ।।

अस्माभिर्निश्चयं क्रीडा कृता, किं प्रजल्पत ? ( हे स्वामिन् ! )अनुरक्तान् भक्तानस्मान्मा त्यज ।। १२६ ।।

४२२ सरिहिं सरेहिं न सरवरेहिं, नवि उज्जाण-वणेहिं ।
देस रवण्णा होन्ति वढ, निवसन्तेहिं सुअणेहिं ।।१२७।।[1]

सरिद्भिर्नदीभिः सरोभिः सरोवरैर्महत्सरोभिर्नाप्युद्यानवनैः देशा रम्याः । हे 'वढ' मूर्ख ! निवसद्भिः स्वजनैर्देशा रम्या भवन्तीत्यर्थः ।। १२७ ।।

४२२ हिअडा पइं एहु बोल्लिअउ, महु अग्गइ सय-वार ।
फुट्टिसु पिए पवसन्ति हउं, भंडय ढक्करि-सार ।।१२८।।

हे हृदय ! त्वया ममाग्रे शतवारं यथा स्यात्तथा तत्प्रोक्तम्, प्रवसता प्रवासं कुर्वता प्रियेण ( सता ) अहं स्फुटिष्यामि, हे 'भण्डय' ! निर्लज्ज ! हे ढक्करिसार ! हे हृतबल ! ।। १२८ ।।

हेल्लि म झंखहि आलु० व्याख्या पूर्ववत् ।।

४२२ एक्क कुडुल्ली पंचहिं रुद्धी,
तहं तह पञ्चहं वि जुअंजुअ बुद्धी ।
बहिणुए तं घरु कहिं किव नन्दउ,
जेत्थु कुडुम्बउं अप्पण-छन्दउं ।। १२९ ।।

एका कुटी शरीरं पञ्चभिरिन्द्रियैः रुद्धा, तेषां पञ्चानां पृथक् पृथग् बुद्धिः । हे भगिनि ! कथय तद्गृहं कथं नन्दतु, यत्र कुटुम्बमात्मच्छन्दकमित्यर्थः (स्वच्छन्दम्) ।।१२९।।

---

१. नयरं न होइ अट्टालएहिं, पायार-तुङ्ग-सिहरेहिं ।
गामो वि होइ नयरं, जत्थ छइल्लो जणो वसइ ।।

वज्जालग्गे २७०

४२२ जो पुणु मणि जि खसफसिहूअउ
चिन्तइ देइ न दम्मु न रूअउ ।
रइ-वस-भमिरु करग्गुल्लालिउ
घरहिं जि कोन्तु गुणइ सो नालिउ ॥१३०॥

यः पुनर्मनस्येव 'खसफसिहूअउ' व्याकुलीभूतस्सन् चिन्तयति, द्रम्मं न ददाति न रूपकम् । स मूढो रतिवशेन भ्रमणशीलः सन् कराग्रोल्लालितं कुन्तं भल्लं गृहे एव गुणयति चालयतीत्यर्थः ॥ १३० ॥

दिवेहिं विढत्तउं खाहि वढ० । नवखी कवि विस गण्ठि० । व्याख्या पूर्ववत् ॥

४२२ चलेहिं चलन्तेहिं लोअणेहिं, जे तइं दिट्ठा बालि ।
तहिं मयरद्धय-दडवडउ, पडइ अपूरइ कालि ॥१३१॥

हे बालिके ! त्वया चलैश्चपलैश्चलमानैर्लोचनैर्ये नरा दृष्टाः, तेषां नराणां 'मयरद्धय' मकरध्वजस्य दडवड-अवस्कंदं कटकं धाटीं अपूर्णे काले पततीत्यर्थः ॥१३१॥

छुड्डु अग्घइ ववसाउ० पूर्ववत् ॥

४२२ गयउ सु केसरि पिअहु जलु, निच्चिन्तइं हरिणाइं ।
जसु केरएं हुंकारडएं, मुहहुं पडन्ति तृणाइं ॥ १३१ ॥

स केसरी सिंहो गतः, हे हरिणाः ! यूयं निश्चिन्तास्सन्तो जलं पिबत, यस्य सम्बन्धिना हुंकारेण युष्माकं मुखेभ्यस्तृणानि पतन्तीत्यर्थः ॥१३२॥

अह भग्गा अम्हहं तणा । व्याख्या पूर्ववत् ॥

४२२ सत्थावत्थहं आलवणु, साहुवि लोउ करेइ ।
आदन्नहं मब्भीसडी, जो सज्जणु सो देइ ॥१३३॥

स्वस्थावस्थानां सुखिनां पुरुषाणां आलपनं सर्वोऽपि लोकः करोति, परं आर्त्तानां नराणां 'मा भैषीः' इति य आश्वासनं ददाति स सज्जन इत्यर्थः ।। १३३ ।।

४२२ जइ रच्चसि जाइट्ठिअए, हिअडा मुद्ध-सहाव ।
लोहें फुट्टणएण जिवं, घणा सहेसइ ताव ।।१३४।।

हे हृदय ! मुग्धस्वभाव ! यद्यद्दृष्टं तत्र तत्र यदि रक्तो-भवसि, तदा प्रचुराणि दुःखानि तव भविष्यन्ति । यथा-स्फुटकेन स्फुटता द्विखण्डीभवता एवंविधेन लोहेन घनस्तापः सह्यते ।।१३४।।

४२३ मइ जाणिउं बुड्डीसु हउं, प्रेम द्रहि हुहुरुत्ति ।
नवरि अचिन्तय संपडिय, विप्पिय नाव झडत्ति ।।१३५।।

मया ज्ञातम्-अहं प्रेमद्रहे बुडिष्यामि, कथं 'हुहुरु' इति शब्दानुकरणं कृत्वा, नवरं केवलं मया विप्रियनौः ( भाषायाम् वियोगबेडा[1]) अचिन्तिता झटिति संपतिता-प्राप्तेत्यर्थः ।।१३५।।

४२३ खज्जइ नउ कसरक्केहिं, पिज्जइ नउ घुण्टेहिं ।
एम्वइ होइ सुहच्छडी, पिएं दिट्ठें नयणेहिं ।।१३६।।

कसरकैः प्रियो न खाद्यते, घुण्टकैर्न तु पोयते, 'एम्वइ' इत्थंभूतेऽपि नयनैः लोचनै दृष्टेन प्रियेण सुखाशा भवतीत्यर्थः ।।१३६।।

४२३ अज्जवि नाहु महुज्जि घरि, सिद्धत्था वन्देइ ।
ताउंजि विरहु गवक्खेहिं, मक्कड-घुग्घिउ देइ ।।१३७।।

अद्यापि 'जि' एवार्थे नाथो ममैव गृहे सिद्धार्थान् सर्षपान् वन्दते, अर्थाच्चलितुकामोऽस्ति, तावदेव 'गवक्खेहिं'

1. नावा इत्यर्थः ।

(गवाक्षेषु) विलोकनैः विरहो मर्कटवत् 'घुग्घिउ' चापल्यं दत्ते। एतावता गवाक्षेषु मटर्कचेष्टां ददातीत्यर्थः ॥१३७॥

४२३ सिरि जर-खण्डी लोअडि, गलि मणिअडा न वीस।
तोवि गोट्ठडा कराविआ, मुद्धए उट्ठ-बईस ॥१३८॥

शीर्षे 'जरखण्डी' जीर्णा 'लोअडी' लोमपटी कम्बलिका परिधानेऽस्ति। कण्ठे मणिकाः विंशत्यनुमिता न सन्ति, 'तोवि' तथापि मुग्धया गोष्ठकाः गोष्ठपुरुषा गोपालाः गोष्ठ गोकुलं यत्र तिष्ठंति इति गोष्ठाः 'तात्स्थ्यात् तद्व्यपदेश' इति न्यायाद् गोष्ठस्थाः पुरुषाः उत्थानोपवेशनं चेष्टानुकरणं कारिताः ॥ १३८ ॥

४२४ अम्मडि पच्छायावडा, पिउ कलहिअउ विआलि।
घइं विवरीरी बुद्धडी, होइ विणासहो कालि ॥१३९॥

हे अम्ब! पश्चात्तापो वर्त्तते, विकाले संध्यायां प्रियः कलहापितः ( कलहितः ) कलहयुक्तो विहितः। विनाशस्य-काले विपरीता बुद्धिभवतीत्यथः ॥१३९॥

४२५ ढोल्ला एह परिहासडो, अइभन कवर्णहि देसि।
हउं झिज्जउं तउ केहि पिअ, तुहुं पुणु अन्नहि रेसि ॥१४०॥

हे नायक! एषा परिभाषा रीतिः 'अइभन' अत्यद्भूता (कस्मिन् देशे) वर्त्तते इति शेषः। हे प्रिये! अहं तवकृते क्षयं प्राप्नोमि, त्वं पुनरन्यस्यार्थे क्षीयसे इत्यर्थः ॥१४०॥

वड्डुत्तणहो तणेण। व्याख्या० पूर्ववत्।

४२६ सुमरिज्जइ तं वल्लहउं, जं वीसरइ मणाउं।
जहि पुणु सुमरणु जाउं गउ, तहो नेहहो कइं नाउं ॥१४१॥

सवल्लभः स्मर्यते, यो वल्लभो विस्मरति मनाक् स्वल्पमपि स्त्रिया। 'जाउं' यदि स्मरणं अहं गतः, तस्य

स्नेहस्य किं नाम न किञ्चिदित्यर्थः ।।१४१।। ?

विणु जुज्झें न वलाहुं० व्याख्या पूर्ववत् ।

४२७ जिब्भिन्दिउ नायगु वसिकरहु, जसु अधिन्नइं अन्नइं ।
मूलि विणट्ठइ तुंबिणिहे, अवसें सुक्कइं पण्णइं ।। १४२ ।।[1]

'नायगु' हे नायक ! जिह्वेन्द्रियं वशीकुरु, यस्य जिह्वेन्द्रियस्य अन्यानि इन्द्रियाणि अधीनानि सन्ति । अतो जिह्वेन्द्रियं वशीकुरु । यथा तुम्बिन्याः मूले विनष्टे सति अवश्यं पत्राणि शुष्यति ।।१४२।।

अवस न सुअहिं सुहच्छिअहिं० । व्याख्या पूर्ववत् ।

४२८ एक्कसि सील-कलंकिअहं, देज्जहिं पच्छित्ताइं ।
जो पुणु खण्डइ अणुदिअहु, तसु पच्छित्तें काइं ।।१४३।।

एकश एकवारं शीलं कलङ्कितं येषां ते शीलकलङ्किताः, तेषां शीलकलङ्कितानां आलोचनारूपाणि प्रायश्चित्तानि दीयन्ते । यः पुनरनुदिनं खण्डयति तस्य प्रायश्चित्तेन किमित्यर्थः ।। १४३ ।।

४२९ विरहानल-जाल-करालिअउ, पहिउ पन्थि जं दिट्ठउ ।
तं मेलवि सव्वहिं पन्थिअहिं, सो जि किअउ अग्गिट्ठउ ।।१४४।।

विरहाग्निज्वालाकरालितः सन् पथिकः पथि मार्गे दृष्टः, तत् तस्मात् सर्वैः पथिकैर्मिलित्वा स एव पथिक 'अग्गिट्ठउ' अग्निष्टः कृतः ।।१४४।।

महुकन्तहो बे दोसडा० । एक्ककुडुल्ली पञ्चहिं रुद्धी० । फोडेन्ति जे हिअडउं अप्पणउं० । चूडुल्लउ चुण्णीहोइसइ० । व्याख्या पूर्ववत् ।।१४४।।

---

1. पंचहं णायकु वसि करहु, जेण होन्ति वसि अण्ण ।
मूल विणट्ठइ तरुवरहं, अवसइं सुक्कइं पण्ण ।।
परमात्मप्रकाशे २-१४०

४३० सामि-पसाउ सलज्जु पिउ, सीमा-संधिहिं वासु ।
पेक्खिवि बाहु—बलुल्लडा, धण मेल्लइ नीसासु ।।१४५।।

स्वामिप्रसादः, सलज्जः प्रियः, सीमासन्धौ वासः, बाहु-बलं प्रेक्ष्य 'धण' इति नायिका निःश्वासं मुञ्चतीत्यर्थः ।१४५।

४३१ पहिआ दिट्ठी गोरडी, दिट्ठी मग्गु निअन्त ।
अंसूसासेहिं कञ्चुआ, तितुव्वाण करन्त ।।१४६।।

हे पथिक ! गोरी दृष्टा मयेति गम्यते, किं कुर्वन्ती दृष्टा ? मार्गं 'निअन्त' पश्यन्ती, पुनः किं कुर्वन्ती, अश्रूच्छ्-वासैः कञ्चुकं तीमोद्वानं आर्द्र-शुष्कं कुर्वन्तीत्यर्थः ।।१४६।।

४३२ पिउ आइउ सुअ वत्तडी, झुणि कन्नडइ पइट्ठु ।
तहो विरहहो नासन्तअहो, धूलडिआवि न दिट्ठु ।।१४७।।

प्रिय 'आइउ' आगतः इति वार्त्ता श्रुता, ध्वनिः कर्णे प्रविष्टः, तस्य विरहस्य वियोगस्य नश्यतो धूलिरपि न दृष्टेत्यर्थः ।।१४७।।

४३४ संदेसें काइं तुहारेण, जं संगहो न मिलिज्जइ ।
सुइणन्तरि पिएं पाणिएण, पिअ पिआस किं छिज्जइ ।१४८।

'तुहारेण' युष्मदीयेन सन्देशेन किमस्ति, संगस्य संयोग [कृते] न मिल्यते यदि, तदा सन्देशेन किमस्ति । हे प्रिय ! स्वप्नान्तरे पीतेन पानीयेन पिपासा तृषा किं क्षीयते, ? अपि तु न तथैव ।।१४८।।

दिक्खि अम्हाराकन्तु० । बहिणि महारा कन्तु० । व्याख्या पूर्ववत् ।।

४३६ एत्तहे तेत्तहे वारि घरि, लच्छि विसण्ठुल धाइ ।
पिअ-पब्भट्ठव गोरडी निच्चल कहिंवि न ठाइ ।।१४९।।

'एत्तहे' अत्र 'तेत्तहे' तत्र द्वारे गृहे लक्ष्मी विसंस्थुला

भवति, प्रियप्रभ्रष्टा गौरीव कुत्रापि निश्चला न तिष्ठति। एतावता यथा लक्ष्मी तथा प्रियभ्रष्टा गौरी ।।१४९।।

वड्डुप्पणु परिपाविअइ। वड्डुत्तणहो तणेण०। व्याख्या॰ पूर्ववत् ।।

४३८ एउ गृण्हेप्पिणु ध्रु मइं जइ प्रिउ उव्वारिज्जइ।
महु करिएव्वउं किंपि णवि मरिएव्वउं पर देज्जइ ।।१५०।।

केनापि सिद्धपुरुषेण विद्यासिद्धये नायिकां प्रति धनादिकं दत्त्वा भर्त्तरि प्रार्थिते सति नायिकाया उक्तिरियम्-एतद्गृहित्वा यदि मया प्रिय उद्वर्त्यते—त्यज्यते तर्हि मम कर्त्तव्यं किं? किमपि नास्ति, परं—केवलं मर्त्तव्यमेव दीयते ।। १५० ।।

४३८ देसुच्चाडणु सिहि-कढणु, घण-कुट्टणु जं लोइ।
मंजिट्ठए अइरत्तिए, सव्वु सहेव्वउं होइ ।। १५१ ।।

देशोच्चाटनं देशपरित्यागः, शिखिक्वथनं, अग्नितापः, घनकुट्टनं यल्लोके वर्त्तते सत्सर्वं मञ्जिष्ठयाऽतिरक्तया सोढव्यम्। एतावताऽतिरक्तत्वं विरूपमित्यर्थः ।। १५१ ।।

४३८ सोएवा पर वारिआ, पुप्फवईहिं समाणु।
जग्गेवा पुणु को धरइ, जइ सो वेउ पमाणु ।। १५२ ।।

पुष्पवतीभिः स्त्रीभिः सार्द्धं स्वपितव्यं परिवारितं निषिद्धमस्ति, जागृतव्यं पुनः कः पुमान् धरति। यदि स्वापो निषिद्धः, तर्हि सुरतादि कथं भवति, यदि स वेदः प्रमाणं भवति ।। १५२ ।।

४३९ हिअडा जइ वेरिअ घणा, तो किं अब्भि चडाहुं।
अम्हाहिं बे हत्थडा, जइ पुणु मारि मराहुं ।। १५३ ।।

हे हृदय ! यदि वैरिणो बहवः सन्ति, तर्हि अभ्रे-अभ्रे आकाशे चटामः (आरोहामः), यदि अस्माकं द्वो हस्तौ स्तः, तदा पुनर्मारयित्वा वयं म्रियामहे ।। १५३ ।।

गय-घड भज्जिउ जन्ति० व्याख्या पूर्ववत् ।।

४३८ रक्खइ सा विसहारिणी, बे कर चुम्बिवि जीउ ।
पडिबिंबिअ-मुंजालु जलु, जेहिँ अडोहिउ पीउ ।।१५४।।

सा स्त्री विषहारिणो पानीयहारिणी तौ करौ हस्तौ चुम्बित्वा जीवितव्यं रक्षति, यकाभ्यां प्रतिम्बिबितानि मुंजानि—तृणानि यत्र तज्जलं अडोहिउत्ति—अकलुषितम् पीतम् ।। १५४ ।।

४३९ बाह विछोडवि जाहि तुहुं, हउं तेवँइ को दोसु ।
हिअय-ट्ठिउ जइ नीसरहि, जाणउं मुंज सरोसु ।।१५५।।

हे प्रिय ! बाहू विछोटय यथा त्वं यासि, तथाऽहमपि बाहू विछोटच यामि, तदा को दोषः ? यदि मम हृदय-स्थितस्त्वं विस्मरसि, तदाहं मुञ्जो भूपतिः सरोष इति जानामि ।। १५५।।

४४० जेप्पि असेसु कसाय-बलु, देप्पिणु अभउ जयस्सु ।
लेबि महव्वय सिवु लहहिं, झाएविणु तत्तस्सु ।।१५६।।

अशेषं कषायबलं जित्वा, जगतोऽभयं दत्त्वा, महाव्रतानि लात्वा, तत्त्वं ध्यात्वा शिवं लभन्ते इत्यर्थः।।१५६।।

४४१ देवं दुक्करु निअय-धणु, करण न तउ पडिहाइ ।
एम्वइ सुहु भुञ्जणहं मणु, पर भुंजणहिं न जाइ ।।१५७।।

निजधनं दातुं दुष्करमस्ति, तपः कर्त्तुं मनो न प्रतिभाति, एवं दानं तपश्च विना सुखं भोक्तुं मनः, परं भोक्तुं न यातीत्यर्थः ।। १५७ ।।

४४१ जेप्पि चएप्पिणु सयल धर, लेविणु तवु पालेवि ।
विणु सन्तें तित्थेसरेण, को सक्कइ भुवणेवि ।।१५८।।

शान्तिनाथतीर्थंकरेण विना सकलां धरां जेतुं त्यक्तुं च तपो लातुं पालयितुं कः शक्नोतीत्यर्थः ।।१५८।।

४४२ गंप्पिणु वाणारसिहिं नर, अह उज्जेणिहिं गंप्पि ।
मुआ परावहिं परम-पउ, दिव्वन्तरइं म जम्पि ।।१५९।।

ये नरा वाराणस्यां गत्वाऽथ उज्जयिन्यां गत्वा मृताः, ते परमं पदं प्राप्नुवन्ति, दिव्यान्तराणि तीर्थान्तराणि मा कथय ।। १५९ ।।

४४२ गंग गमेप्पिणु जो मुअइ, जो सिव-तित्थ गमेप्पि ।
कीलदि तिदसावास गउ, सो जम-लोउ जिणेप्पि ।।१६०।।

यो गङ्गां गत्वा मृतः, यश्च शीवतीर्थं गत्वा मृतः, स त्रिदशावासं देवलोकं गतः सन् क्रीडति, किं कृत्वा ? यमलोकं मरणं जित्वेत्यर्थः ।। १६० ।।

४४३ हत्थिमारणउ, लोउ बोल्लणउ, पडहु वज्जणउ, सुणउ भसणउ ।

हस्ती मारणशीलः, लोकः कथनशीलः, पटहो वादनशीलः, श्वा भषणशीलः ।।

४४४ रवि-अत्थमणि समाउलेण, कण्ठि विइण्णु न छिण्णु ।
चक्कें खण्डु मुणालिअहे, नउ जीवग्गलु दिण्णु ।। १६१ ।।

सूर्यास्तमने समाकुलेन चक्रवाकेन कण्ठे वितीर्णं दत्तं स्थापितं सत् मृणालिकायाः कमलिन्याः खण्डं न छिन्नं न भक्षितम्, 'नउ' उत्प्रेक्ष्यते-जीवस्य निर्गच्छतोऽर्गला दत्ता ।। १६१ ।।

४४४ वलयावलि-निवडण-भएण, धण उद्धब्भुअ जाइ ।
वल्लह-विरह-महादहहो, थाह गवेसइ नाइ ।। १६२ ।।

नायिका वलयावलिनिपतनभयेन उर्ध्वभुजा याति । 'नाइ' उत्प्रेक्ष्यते-वल्लभविरहमहाह्रदस्य स्ताघं गवेषयतीत्यर्थः ।। १६२ ।।

४४४ पेक्खेविणु मुहु जिण-वरहो, दीहर-नयण सलोणु ।
नावइ गुरु-मच्छर-भरिउ, जलणि पविसइ लोणु ।। १६३ ।।

'नावइ' उत्प्रेक्ष्यते-गुरुमत्सरभृतं[1] लवणं ज्वलने प्रविशति, किं कृत्वा ? जिनवरस्य दीर्घनयनं सलवणं सलावण्यं मुखं प्रेक्ष्येत्यर्थः ।।१६३।।

४४४ चम्पय-कुसुमहो मज्झि, सहि भसलु पइट्ठउ ।
सोहइ इन्दनीलु, जणि कणइ बइट्ठउ ।।१६४।।

चम्पककुसुमस्य मध्ये भ्रमरः प्रविष्टः, 'जणि' उत्प्रेक्ष्यते कनके उपविष्टं इन्द्रनीलरत्नं शोभते इत्यर्थः ।।१६४।।

४४५ अब्भा लग्गा डुंगरिहिं, पहिउ रडन्तउ जाइ ।
जो एहा गिरि-गिलण-मणु, सो किं धणहे धणाइ ।।१६५।।

१. मत्सरः 'खार' इति भाषायाम् ।

पर्वतेषु अभ्राणि—मेघा लग्नाः, पथिको रटन् याति, उत्तरार्द्धेन रुदनकारणमाह-यो मेघो गिरिगिलनमनाः स ईदृक् किं नायिकाया धनानीच्छति? तान् रक्षतीति भावार्थः ।। १६५ ।।

४४५ पाइ विलग्गी अंत्रडी, सिरु ल्हसिउं खन्धस्सु ।
तोवि कटारइ हत्थडउ, बलि किज्जउं कन्तस्सु ।। १६६ ।।

अत्र पादविलग्नमान्त्रं, शिरः (स्कन्धयोः) स्कन्धं प्रति ह्लसितं ( स्रस्तं ) पतितं, ततोऽपि हस्तः क्षुरिकायां, अहं कान्तस्यात्मानं बलिं क्रिये इत्यर्थः ।। १६६ ।।

४४५ सिरि चडिआ खन्ति प्फलइं, पुणु डालइं मोडन्ति ।
तोवि महद्दुम सउणाहं, अवराहिउ न करन्ति ।। १६७ ।।

शिरसि चटिताः फलानि खादन्ति, पुनः शाखां मोटयन्ति, तथापि महाद्रुमाः शकुनोनामपराधं न कुर्वन्तीत्यर्थः ।। १६७ ।।

४४६ सीसि तुहरु खणु विणिम्मविदु खणु,
कंठि पालम्बु किदु रदिए विहिदु ।
खणु मुंडमालिए जं पणएण तं नमहु,
कुसुम—दाम—कोदण्डु कामहो ।। १६८ ।।

कामस्य कुसुमदामकोदण्डं प्रणयेन स्नेहेन नमत, तत्किं ? यत् धनुः रत्या कामनार्या क्षणं शीर्षे शेखरो विनिर्मापितः, यत्क्षणं कण्ठे हारः प्रालम्बः कृतः, यत्क्षणं मुण्डमालिकायां मस्तके विहितं ।। १६८ ।।

**शदमाणुशमंशभालके कुम्भशहश्च वशाहे शंचिदे ।**

स्त्रियाः शतमनुष्यमांसभारकः एवंविधः कुम्भ-सहस्रः सञ्चितः ।

४४८ हेट्ठ-ट्ठिय-सूर-निवारणाय, छत्तं अहो इव वहन्ती ।
जयइ ससेसा वराह-सास-दूरुक्खुया पुहवी ।। १६९ ।।

अधःस्थितसूर्यातपनिवारणाय सशेषा वराहश्वासदूरोत्खाता पृथ्वी छत्रं अध इव वहन्ती एवंविधा जयति ।।१६९।।

**गउडवहे गाथा १५**

**।। इति श्री हैमव्याकरणप्राकृतवृत्तिगतदोधकार्थ समाप्तः ।।**

लिखितो महोपाध्याय, य सं० १६७२ वर्षे शके १५३८
प्रथम वैशाख वदि १४ शनौ.

# संक्षिप्त प्राकृतशब्दरूपमाला

## (१) अकारान्तपुल्लिंग 'जिण' (जिन) शब्दः ।

| | एकवचन. | बहुवचन, |
|---|---|---|
| प्रथमा– | जिणो. [[1]जिणे] | जिणा. |
| द्वितीया– | जिणं. | जिणा, जिणे. |
| तृतीया– | जिणेण, जिणेणं. | जिणेहि, जिणेहिँ, जिणेहिं. |
| चतुर्थी– | [2]जिणाय, जिणस्स. | जिणाण, जिणाणं. |
| पंचमी– | जिणत्तो, जिणाओ, जिणाउ, जिणाहि, जिणाहिन्तो, जिणा. | जिणत्तो, जिणाओ, जिणाउ, जिणाहि, जिणेहि, जिणाहिन्तो, जिणेहिन्तो, जिणासुन्तो, जिणेसुन्तो. |
| षष्ठी– | जिणस्स. | जिणाण, जिणाणं. |
| सप्तमी– | जिणे, जिणम्मि, [जिणंसि]. | जिणेसु, जिणेसुं. |
| संबोधन– | हे जिण, जिणो, जिणा. | हे जिणा. |

एवम्–वीर-राम, देव, सावग, इत्यादयः ॥

★

---

१. इदृशे कोष्ठके दत्तानि रुपाणि आर्षरुपाणि ज्ञेयानि ।

२. प्राकृते चतुर्थ्याः स्थाने षष्ठ्या प्रयोगो भवति. किन्तु तादर्थ्ये चतुर्थ्या एकवचनप्रयोगो भवति, देवाय, गुरवे इत्यादयः ।

## (२) इकारान्तपुल्लिंग 'मुणि' (मुनि) शब्दः ।

| | एकवचन. | बहुवचन. |
|---|---|---|
| प्रथमा– | मुणी. | मुणउ, मुणओ, मुणो, मुणिणो. |
| द्वितीया– | मुणिं. | मुणिणो, मुणी. |
| तृतीया– | मुणिणा. | मुणीहि, मुणीहिँ, मुणीहिं. |
| चतुर्थी– | मुणिणो, मुणिस्स. | मुणीण, मुणीणं. |
| पंचमी– | मुणिणो, मुणित्तो, मुणीओ, मुणीउ मुणीहिन्तो. | मुणित्तो, मुणीओ, मुणीउ, मुणीहिन्तो, मुणीसुन्तो. |
| षष्ठी– | मुणिणो, मुणिस्स. | मुणीणं, मुणीणं. |
| सप्तमी– | मुणिम्मि. [मुणिसि]. | मुणीसु, मुणीसुं. |
| संबोधन– | हे मुणि, मुणी. | मुणउ, मुणओ, मुणी, मुणिणो. |

एवम्–नेमि-कवि, सुविहि, रिसि, पाणि, इत्यादयः ।

★

## (३) उकारान्तपुल्लिंग 'गुरु' (गुरु) शब्दः ।

| | एकवचन. | बहुवचन. |
|---|---|---|
| प्रथमा– | गुरू. | गुरवो, गुरओ, गुरउ, गुरू, गुरुणो. [गुरवे] |
| द्वितीया– | गुरुं. | गुरुणो, गुरू. [गुरवे] |
| तृतीया– | गुरुणा. | गुरूहि, गुरूहिँ, गुरूहिं. |
| चतुर्थी– | गुरुणो, गुरुस्स. | गुरूण, गुरूणं. |
| पंचमी– | गुरुणो, गुरुत्तो, गुरूओ, गुरूउ, गुरूहिन्तो. | गुरुत्तो, गुरूओ, गुरूउ, गुरूहिन्तो, गुरूसुन्तो. |

| | | |
|---|---|---|
| षष्ठी - | गुरुणो, गुरुस्स. | गुरूण, गुरूणं. |
| सप्तमी— | गुरुम्मि. [गुरुंसि] | गुरूसु, गुरूसुं. |
| संबोधन- | हे गुरू गुरु. | गुरवो, गुरओ, गुरउ, गुरू, गुरुणो [गुरवे] |

एवम्–साहु, बंधु, भिक्खु, पहु, इंदु, इत्यादयः ।

★

## (४ 'ऋ'-कारान्तपुल्लिंग 'कत्तार—कत्तु'[1] (कर्तृ) शब्दः ।

| | एकवचन. | बहुवचन. |
|---|---|---|
| प्रथमा— | कत्ता, कत्तारो, | कत्तारा, कत्तवो, कत्तओ, कत्तउ, कत्तू, कत्तुणो. |
| द्वितीया— | कत्तारं. | कत्तारे, कत्तारा. कत्तुणो, कत्तू. |
| तृतीया— | कत्तारेण, कत्तारेणं, कत्तुणा. | कत्तारेहि, कत्तारेहिँ, कत्तारेहिं. कत्तूहि, कत्तूहिँ, कत्तूहिं. |
| चतुर्थी — | कत्तारस्स, कत्तुणो, कत्तुस्स. | कत्ताराण, कत्ताराणं, कत्तूण, कत्तूणं |
| पंचमी— | कत्तारत्तो, कत्ताराओ, कत्ताराउ, कत्ताराहि, कत्ताराहिन्तो कत्तारा. | कत्तारत्तो, कत्ताराओ, कत्ताराउ, कत्ताराहि, कत्तारेहि, कत्ताराहिन्तो, कात्तारेहिन्तो, कत्तारासुन्तो, कत्तारेसुन्तो. |

१. विशेषणवाचिन ऋकारान्तस्य ऋकारस्य आर् भवति, सम्बन्धवाचिनश्च ऋकारस्य अर् भवति, प्रथमायाः द्वितीयाया एकवचनं विहाय सर्वत्र ऋकारस्य उकारोऽपि भवति ।

| | | |
|---|---|---|
| | कत्तुणो, | |
| | कत्तुत्तो, कत्तूओ, | कत्तुत्तो, कत्तूओ, |
| | कत्तूउ, कत्तूहिन्तो. | कत्तूउ, कत्तूहिन्तो, कत्तूसुन्तो. |
| षष्ठी— | कत्तारस्स. | कत्ताराण, कत्ताराणं. |
| | कत्तुणो, कत्तुस्स. | कत्तूण, कत्तूणं. |
| सप्तमी— | कत्तारे, कत्तारम्मि, | कत्तारेसु, कत्तारेसुं, |
| | [कत्तारंसि], | कत्तूसु, कत्तसुं. |
| | कत्तुम्मि [कंत्तुंसि]. | |
